Shri Raghunath Temple MSS. Library,
JAMMU

No. १४८५

Title गदाधर्यां माकांक्षा वादः

Author गदाधरः

Extent ३१ Age x

Subject न्याय शास्त्रं

गदाधर्यां आकांक्षावादः

१५८५

प. ३१

खंड मूल गदाधरी आकांक्षावाद

न्याय

पत्रे ३१

श्लोक
८०८

शाब्दबोधे समानविषयकशाब्दबोधाभावस्य हेतुत्वं न वा यस्य येन विना स्वार्थानुभावकत्वं तदपर्यवसानमिति प्रमग्रं
थेन पदमिष्टस्यात्वया अनुभावकत्वेनस्यापर्यवसानमिग्ररूपता वस्तुतस्त्वेवप्रक्रांतस्य तच्छब्देनैव परामर्शादा
त्मनिष्ठशाब्दबोधाभावस्याप्रक्रांततया तठपरामशात् तथा चात्मनिष्ठशाब्दबोधाभावस्यापर्यवसानरूपत्वे विते
ध इति वाच्यं पदनिष्ठान्वयबोधकत्वाभावो हि नान्वयबोधपर्याप्तत्वघटितमदुपधायकत्वस्याभावः तथा सति शा
ब्दानुभवपूर्वकाले पदे तत्सत्वेन तदभावरूपकारणासत्वान्न शाब्दबोधानुपपत्तेः परंतु शाब्दबोधानाभाव एव स
एवात्मनिष्ठशाब्दबोधाभावपर्यवसित इति न च शाब्दबोधोपधानाभावः शाब्दबोधवैशिष्ट्याभावः स्वरूपयोग्य
पदेन्वेदसोसहकारिपदांतरविरहप्रयुक्तः तदा स्वरूपायोग्यपदप्युक्ताद्दशाब्दबोधापत्तिप्रसंगस्मिपाफलोपधायक
त्वाभाव एव पदांतरव्यभिचारप्रयुक्तत्वेन निवेशनीयः फलोपधायकत्वस्य च फलाव्यवहितपूर्ववर्तित्वसहितत्वस्वरू
पयोग्यत्वात्मकस्याभावः स्वरूपयोग्यविशेष्यीभूतस्वरूपयोग्यताविरहप्रयुक्तः इति अतिप्रसंगानवकाशादिति वाच्यं

राम·

तादृशाभावविवक्षणे पूर्वोक्तानुपपत्तेर्दुर्वारत्वात् तथा स्वरूपयोग्यत्वसहितफलवैशिष्ट्यस्य स्वरूपफलोपधानाभावविवक्ष
येव स्वरूपयोग्ये पदेऽतिप्रसंगस्य वारणीयतायान्तत्रात्मनोऽपि समवायित्वेन शाब्दबोधस्य स्वरूपयोग्यतया स्व
रूपयोग्यतासहितफलोपधानाभावस्य फलकालेऽसत्त्वेन फलाभावपर्यवसितत्वात् अत एव मिश्रोक्तमीदृशाका
ङ्क्षायामपि शाब्दबोधप्रागभावस्वरूपत्वमपि संगच्छते शाब्दबोधोपधायकत्वाभावस्याकाङ्क्षात्वेन तदसंगतेः स्वरूपयोग्य
पदं साकांक्षत्वव्यवहारवारणाय पदविशेषनिष्ठत्वपर्यवसानपदार्थेतराभावप्रतियस्य येनेति यस्य पदस्य समभ्य
र्थेषष्ठी तथा च पदस्य निष्ठं स्वार्थान्वयानुभावकत्वं येन पदेन विना पदस्य व्यतिरेकप्रयुक्तं तत्स्येति तस्य तद्घटितनिष्ठ
त्पर्यः तन्निरूपितं प्रकृतत्वयानानुभावकत्वस्य पर्यवसाने अभिधानापर्यवसान पदार्थः घटादिपदस्यामादिपदसहका
रेणाकर्मत्वादेर्घटादेरोबेयतासंसर्गबोधकतया तन्निष्ठतादृशसंसर्गानुभावकत्वममादिपदव्यतिरेकप्रयुक्तं अमा
दिपदनिष्ठं च घटादिपदव्यतिरेकप्रयुक्तं सहकार्यसमवधानकाले स्वरूपायोग्यनिष्ठस्य कार्यानुपधायकत्वस्यास

हक्त्यादिविरहप्रयुक्तत्वादिति तत्र लक्षणासमन्वयः कर्मत्वादिपदस्य तादृशान्वयबोधायोग्यतया तद्विरहो न तादृशा
न्वयबोधकत्वस्य प्रयोजको न वा तत्र निरुक्तघटाभावे घटादिपदव्यतिरेकप्रयुक्तः अतो नातिप्रसंगः न चान्वयबोधान
नुभावकत्वस्यान्वयबोधाव्यवहितप्राक्कालनिर्वाहायान्वयबोधानुपधानरूपतया व्याख्यानात् तस्य सति काले स्व
स्मिन्न्यूनत्वानुपधानस्यस्याव्यवहितप्राक्कालावच्छेदेन स्वव्यतिरेकेनापि प्रयुक्तत्वात् स्वस्यापि स्वसाकांक्षतापत्तिरिति
वाच्यं इष्टत्वात् न एव एकान्यातपदयोस्याप्यपी: इतिवर्तमानत्वाद्योरन्वयतिर्वाहि: अन्वयबोधविशेषयदविशे
षज्ञानहेतुतायाआवश्यकत्वं अन्यथाकचित्पदस्यविरहोऽन्वयबोधविशेषानुपधानप्रयोजकः कस्याचिन्न एवं
किंचित्पदनिष्ठतदनुपधानपदान्तरविरहः प्रयोजकः न तु सकलपदनिष्ठतदनुपधाने इत्यत्र नियामकाभावप्रसंगा
त्तावनैव च घटः कर्मत्वमित्यादितो घटीयकर्मत्वाद्यवबोधनिर्वाहिऽन्वयबोधानुपधानहेतुतायां निरूक्तपदविशेषी स्म॰
यत्वनिवेशनयफलमिति ध्येयं पदज्ञानप्रमाननमाशाब्दबोधहेतुतामतेपि पदविरहेपि तत्स्यापारपदार्थापस्थितिसत्वे

शाब्दबोधेसत्त्वापदविरहेणतादृशशाब्दबोधानुपधानप्रयोजकइतिपदत्वञ्जन्यपदार्थोपस्थितेर्हेतुत्वंविनास्वा
र्थान्वयानुभावकत्वमितिविवक्षणीयंपदस्यस्मृतावप्यहेतुत्वेनपदस्थलेतज्ज्ञाननिवेशनीयंपसद्व्यक्तिज्ञान
जन्योपस्थितेर्नव्यतिरेकः तादृशोपस्थितेः तादृशोपस्थितिप्रयुक्तान्वयानुभावकत्वविरहात्तयोः पदयोः परस्परसा
कांक्षतोपपत्तयेयद्धर्मप्रकारकज्ञानजन्यायाउपस्थितेर्यद्धर्मप्रकारकज्ञानजन्योपस्थितिंविना अन्वयानुभावकत्वं
तद्धर्मविशिष्टपदयोरपर्यवसानेनविवक्षणीयंतादृशतादृशधर्मः आनुपूर्वीविशेषपदंघटपदंपदत्वादिकंतत्तद्धर्मप्र
कारकोपस्थितिस्तज्जन्यपदार्थोपस्थित्याचकदाचित्कदाचिदेकसत्त्वेऽपराभावात्कार्याभावइतिनानुपपत्तिः एतेन
कर्मत्वादिपदेऽम्पदत्वादिमज्जन्योर्थोपस्थितिकालेऽपिकर्मत्वादेर्घटादेरन्वयसंबंधबोधोदयात् अशादिपदे
स्यकर्मत्वादिपदत्वेनअम्मादर्थोपस्थितेरविनदबोधादमादिपदजन्यार्थोपस्थितिविरहस्यप्रयोजकत्वेऽपिनदोषः
अयमम्पदइत्यादिविपरीतानुपूर्वीज्ञानजन्यपदार्थोपस्थितेरन्वयबोधानुत्पादेदादिपदाव्यवहितोत्तराम्

पदत्वप्रकारकज्ञानजन्यार्थोपस्थितित्वेनैव शाब्दबोधहेतुतोपगमात् तत्तद्रूपावच्छिन्नाभाव एवान्वयबोधाभावप्र
योजको न त्वम्पदत्वादिप्रकारकज्ञानजन्योपस्थितित्वावच्छिन्नाभावः तेन रूपेणाहेतुत्वात् विवक्षणीयं च तत्तद्धर्म
प्रकारकज्ञानत्वावच्छिन्नाभावस्यैव प्रयोजकत्वं अन्यथा घटादिपदाव्यवहितोत्तरत्वम्पदत्वादिधर्मोपस्थापकपदेनोपादे
यः न च घटपदाव्यवहितोत्तरत्वमपदत्वादिप्रकारकज्ञानजन्योपस्थितित्वावच्छिन्नाभावस्य शाब्दबोधानुपधानप्रयो
जकत्वमादायैव घटादिपदे तदव्यवहितोत्तरमादिपदसाकांक्षत्वमुपपादनीयं केवलामादिपदत्वावच्छिन्नसाकांक्षा
घटादिपदेनात एव एवं घटः कर्मत्वमित्यादिपदत्वप्रकारकोपस्थितित्वावच्छिन्नाभावस्यान्वयानुपधानप्रयोजकत्वा
दमादिपदे घटादिपदनिरूपिताकांक्षायाः अनिर्वाहे विवक्षितः अमादिपदे अमादिपदाव्यवहितपूर्ववर्त्तिघटादिप
दत्वावच्छिन्नसाकांक्षायाः उपगन्तव्यत्वादिति वाच्यं एवमप्येयविघटमित्यादेर्घटकवाक्यानन्तर्गतघटादिपदव्यक्तेः परमादृश एम॰
वाक्यानन्तर्गतामादिपदसाकांक्षतापत्तेर्दुर्वारत्वात् एतेन कर्मत्वादिविषयकशाब्दबोधे घटादिपदत्वप्रकारकामादि

पदत्वप्रकारकपदत्वाद्युपस्थितित्वेन एवं घटादिविषयकशाब्दबोधे पिघ अमादिव्यवहितपूर्वत्वमनंतर्भाव्य
घटपदत्वादिप्रकारकज्ञानजन्यपदार्थोपस्थितित्वेनैवामध्यस्थत्वादिना शाब्दबोधकारणतापार्थ्याविशेषमन
न्तर्भाव्य घटमित्यानुपूर्वीप्रकारकज्ञानत्वेन पृथगेव कारणताः कल्प्यते अस्मदत्वघटपदत्वादिप्रकारकज्ञा
नजन्योपस्थितिसाशाब्दबोधजनने तादृशानुपूर्वीज्ञानस्य सहकारित्वोपगमेन विपरीतानुपूर्वीज्ञानाच्छाब्दबोध
कारणासंभवात् न च तादृशानुपूर्वीज्ञानस्य स्वतंत्रकारणताकल्पनापेक्षया पदार्थोपस्थितिकारणतायामेव ता
दृशानुपूर्वीज्ञानजन्यत्वनिवेशनमुचितमितिवाच्यं प्रकृते प्रत्ययस्य चरमकालक्षणाभेदेनार्थभूयस्त्वादर्थभेदे
नपदार्थोपस्थितीनां बहुतरकारणतायामपदप्रकृतिप्रत्ययानुपूर्वीज्ञानजन्यत्वनिवेशे एकैकमर्थमन्तर्भाव्य
एकैकप्रत्ययादिजन्योपस्थितेर्बहुविधप्रत्ययादिभेदेन कारणतानामेदात्कारणताकल्पप्रसंगात् प्रकृतिप्रत्यया
नुपूर्वीज्ञानानां चार्थभेदान्निवेशपृथक्कारणताकल्पनस्यैवोचितत्वात् घटो लक्षसं इत्यादिव्यभिचारवारणसंभ

५

वारितिघटपदाप्पदत्वादिप्रकारकज्ञानजन्योपस्थितत्वावच्छिन्नाभावस्यान्वयबोधानुपधानप्रयोजकत्वं दुरुप
हृवमित्यतोपि न निस्तारः उक्तातिप्रसंगस्य घ्रम्यघटरस्मादौ साकांक्षत्वप्रसंगस्य दुर्वारत्वात् द्वाराकुः पदस्य दविशेष्यक
पदस्य वृत्तियोगिकयादृशधर्मप्रकारकज्ञानत्वेन यादृशान्वयबोधहेतुज्ञानस्य दस्य न स्वपित्तियोगिकतादृशध
र्मपरत्वं तादृशान्वयबोधानुपधानसहितं तादृशान्वयबोधोपपिकतस्य साकांक्षेत्युच्यते तादृशधर्मः प्रसपपदे
प्रकृतिपदस्याव्यवहितोत्तरत्वं प्रकृते च प्रसपप वाच्यव्यवहितपूर्वत्वं विनिगमनाविरहेणोभयज्ञानस्यैव शाब्दबो
धहेतुत्वादेकतरज्ञानादपि शाब्दबोधोत्पत्तेरनुभाविकत्वात्पदयोरपेक्षयोः ज्ञानयोः शाब्दबोधोपधायकता
व्यभिचारवारणाजिह्नतैव अथैवं घटपदाविसादिद्वंद्वविभक्तेः पूर्वपदसाकांक्षतानुपपत्तिः एवमद्यपिप्पलीमि
त्यादिमन्तूहृषच पूर्ववर्तिपानाद्युद्दिपदस्याकांक्षताविभक्तेर्न स्यान् उत्तरपदेन व्यवधानाभावस्य विवक्षितत्वात्ताय्यं राम.
रोघव्युत्तिवाच्येनामत्वादेरनुपस्थितिदशायां अपि शाब्दबोधदर्शनात् तादृशज्ञानस्य न तद्धेतुत्वात्सन्यच तद्धेतुत्वे घटप

रात्वानयनीलघटादिपदशक्तिग्रहाभावान्नयोग्यतादिज्ञानविरहाद्वा पदार्थान्वयः तत्रापि कर्मत्वादेर्घटान्वयबोध
प्रसंगात् अत्र हि द्वंद्वस्थले समासांगानेकपदार्थानन्वयेऽपरपदार्थान्वयं कश्चिदभ्युपैति एवं राजपुरुषं पश्यतीत्यादौ नञ्
रूपेऽपि पूर्वपदार्थस्य राजादेर्विभक्त्यर्थेऽन्वयादिति चेन्न समासस्थले समासाव्यवहितोत्तरत्वस्यैव प्रत्यये समासघट
कतत्तत्पदाकांक्षाऽऽलोचनमात्रतज्ज्ञानस्यैव प्रत्ययार्थतत्तत्पदार्थान्वयबोधहेतुत्वात् राजपुरुषमित्यादितत्पुरु
षस्थले पूर्वपदस्य रूपविशेषणत्वेन स्वार्थे परतयाऽगृहीतत्वात् तदर्थे न विभक्त्यर्थान्वयः द्वंद्वसमासस्थले समासघ
टकैकपदार्थे न विभक्त्यर्थान्वयबोधे अपरपदार्थान्वयसामग्र्या अपेक्षणीयत्वात् नो क्षतिः प्रकृतगः प्रकृतिप्रत्ययाभा
वोपन्नास्ति तत्तत्पदार्थान्वयबोधेन नञ्पदयोरेकधर्मिकापरपदसमभिव्याहारज्ञानस्य हेतुत्वात् तत्तत्पदसमभिव्या
हार एवं तत्तत्पदाकांक्षा अतो न विभिन्नवाक्यांतर्गतपदयोराकांक्षा समभिव्याहारस्य पदस्य रूपणान्वयबोधकता
भिप्रायविषयत्वं उद्देश्यविधेयभावेनान्वयबोधे समभिव्याहारस्य सोऽपि पर्यंतव्याकांक्षा अत एव यत्रोद्देश्यत्वचक

5

पदपूर्वं विशेष्यवाचकपदस्य धर्मारोप्यप्रमेवेत्यादौ नाकांक्षेति विशेष्याविमर्शनं दोषः एतावता साकांक्षत्वं विशिष्टवि
शिष्टतादृशरूपेण ज्ञानं हेतुः ननु निरुक्ताकांक्षाव्यवहारविषयतावच्छेदकरूपेण विशेषरूपेण हेतुतायां आवश्य
कतया शाब्दानुभवजनकत्वमित्यादि परमतमित्यादि पक्षो मीमांसकः इत्यादिना अरुणया गवेत्यादि परिग्रहः नामार्थ
दीनां नीलादीनां धात्वर्थानां च घटादीनां न चास्मन्मते इवोभयत्रापि अन्वये समानविभक्तिकपदयोः साकांक्षतामा
त्रमपि तादृशान्वयबोधोपगमे न संभवात् तादृशान्वयबोधः पदैर्नोपेयत इत्यत आह विशेषान्वितेति विशेषणपदान्त
रविभक्त्यर्थोर्थः तदनन्वयेन तादृशविभक्त्यर्थाधुतापत्तेरित्यर्थः कर्मत्वाद्यर्थ एव द्वितीयादेरनुशिष्टत्वादित्यर्थः यद्य
पि नीलो घट इत्यादौ नीलादेः स्वार्थान्वयशक्तियान्वयवत्त्वादि मीमांसकमते क्रिया विशेष्यतया तदन्वयात्तथमायाः क
रत्वं नार्थः तथापि संसर्गबोधकतया तत्स्वार्थकान्वविशेषणाविशेष्यभावेन नीलघटादयोरन्वये यत्(ति) कतावच्छेद
कप्रकारताश्रयवृत्तित्वेन उक्तज्ञानहेतुतायां मानाभावात् विशेषरूपेण हेतुतायां आवश्यकत्वाच्चानुपूर्व्यादीनावि रामः

शाब्दतः संदेहविपरीतज्ञाने च शाब्दबोधहेतुत्वानुपपत्तेः घटमानयेति चैत्र इत्यादौ घटादिपदैरयादिपदानां पर
स्पराकांक्षासत्त्वेऽप्युपपादयति नामेति नामपदं प्रातिपदिकं घटादि यं अमविभक्तिपदं अमादिसुब्विभक्तिपदं धा
तुपदं नीप्रभृतिः आख्यातपदं तिबादिः क्रियापदं आनयतीत्यादिः आख्यातान्तसमुदायः कारकपदं घटमित्या
दिः सुबन्तसमुदायः एतेषां नामसुपोः सुपधात्वोः धात्वाख्यातयोः क्रियावाचकपदयोरितियावत् परस्परं विना परस्प
रव्यतिरेकप्रयुक्तेः परस्परस्य परस्परोपस्थितेर्न स्वार्थानुभावकत्वं परस्परार्थान्वयानुभावकत्वाभावे अतस्तत्तस्य
दद्रूपस्य मिथः साकांक्षतेति शेषः ननु समानविभक्तिकयोर्नीलघटादिरूपविशेषणविशेष्यपदयोरप्याकांक्षाया
मावश्यकत्वं अन्यथा नीलघटयोर्विशेषणविशेष्यभावेनान्वयबोधानुपपत्तेरिति कथं नामपदेन प्रत्ययपदस्या
कांक्षा गृहीतेसाकांक्षायां परमते नीलघटयोर्विशेष्यविशेषणाभावेनान्वयबोधो न भवत्येवातो नामपदयोरा
कांक्षाविरहेऽपि न क्षतिः स्वमतेऽपि तयोरभेदेनान्वयेनाकांक्षा अपि तु पदस्य धर्मिपरतया तदर्थधर्मिणः घटादाव

भेदेन विशेषणतानास्वीकारादन्वयबोध एवाकांक्षा नामादिपदानां विभक्त्यादिमात्रेण साकाङ्क्षत्वं च तदन्व
याभिप्रायेणाभिहितमित्याह परमतइत्यादि परो मीमांसकः इत्यादिना अरुणया गवेत्यादिपरिग्रहः नामार्था
दीनां नीलादीनां कारकाणां च घटादीनां न चास्मन्मतेऽपि वोभयत्रापि अन्वये समानविभक्तिकपदयोः साकांक्ष
तायामपि तादृशान्वयबोधोपगमेन संभवात् तादृशान्वयबोधः परैर्नोपेयत इत्यत आह विशेषान्वितेति विशेष
णपदोत्तरविभक्त्यर्थः तदनन्वयेन तादृशविभक्तेरसाधुतापत्तेरित्यर्थः कर्मत्वाद्यर्थे एव हि द्वितीयादेरनुशिष्टत्वा
दित्यर्थः यद्यपि नीलो घटो नीलादेः स्वातन्त्र्येण क्रियान्वयवादिमीमांसकमते क्रियाविशेष्यतया तदन्व
यात्प्रथमायाः कर्तृत्वं नार्थः तथापि संख्याबोधकतया तत्सार्थकत्वं न च विशेषणविशेष्यभावेन नीलघटाद्यो
रन्वयेऽपि नीलादिपदोत्तरप्रथमाया नीलाद्यन्वितसंख्याबोधकत्वमुपेयत इति तन्मतेऽपि तत्सार्थकत्वोपप राम·
त्तिरिति वाच्यं घटपदोत्तरप्रथमा— —रेकत्वादिबोधेन तत एवार्थतत एव घटनिष्ठाभेदप्रतियोगिनि नीलेऽप्येकत्वला

भात्तत्रैकत्वादिबोधोपगमस्यार्थपौनरुक्त्यापत्यत्वात् न च परमतेपि नीलघटपदयोरभेदबोधसत्तेन कालिकतयाघ
टैकत्वत्वाभान्नीलोप्येकत्वत्वाभोभवतीति नीलपदोत्तरविभक्तेरेकत्वपरतानसंभवतीति वाच्यं नीलपदोत्तरविभ
क्तेरेकत्वपरतायामेव विभक्तिद्वयस्य विशेषणविशेष्यभिन्नैकत्वपरतायालाघवेन निश्चयात्तदन्वयानुपपत्त्या
धर्मितोऽभेदलाभसंभवेन तदुपयोगितया विशेषणान्वितविभक्तेरेकत्वपरतायाः औचित्यात् एवं नीलोस्ति घटोस्ति
त्यत्रोयथावाक्यार्थद्वयबोधः तथा तत्स्थलकृतसामग्रीद्वयान्नीलोस्तिघटोस्तीत्यत्रापि वाक्यार्थद्वयबोधः तत्र तत्स्थ
लकृतसामग्रीद्वयान्नीलोस्तिः घटोस्तीत्यादावपि वाक्यार्थद्वयबोधस्यस्वीकारसंभवान्नीलपदघटपदयोः परस्प
राकांक्षाघटितसामग्र्यंतरं कल्पयित्वा तदर्थयोर्विशेषणविशेष्यभावेनान्वयबोधकल्पनमयुक्तमिति वाच्यं न
विशिष्टवैशिष्ट्येनान्वयबोधइतिन नीलादिविशेषितघटादौक्रियान्वयबोधइत्यर्थः अपितु नीलोस्तिघटोस्तीनील
मानयघटमानयेत्यादिर्वाक्यार्थद्वयएवेति शेषः अथैवं तादृशवाक्यस्थलीयनीलपदादौ पीतघटादौ च प्रवृत्तिः

7

स्यात् एवमरुणया गवा सोमं क्रीणातीत्यादौ आरुण्यपशून्यगवा अरुणपटादीनां च सोमक्रयणांशान्वार्थः स्यादि
त्यत आह किं त्विति। समाजः नीलघटादौ परस्परसंवलितेन न बोधः आर्थः अर्थाधीनः अर्थापत्तिरूपोन्वयः कादाचि
क इति यावत् अयमाशयः एकजातीयविभक्त्यावभिन्नो कत्वाभिन्नकर्मत्वादिपरतया लाघवेन लक्षणानौचि
त्यात् द्रव्यपरत्वे क्रयणसाधनत्वेनैकद्रव्यलाभे साधनत्वेन द्रव्यांतरे अन्वये आकांक्षानुपपत्ते एपि द्रव्यपरत्वासं
भवात् गुणपरत्वे तु गुणस्यावश्यक्रयणस्य क्रयसाधनत्वेन विधानेन तस्य धार्मिभूतद्रव्यमंतराक्रत्वे वसाधनत्व
मिति प्रतिसंधानात् किं द्रव्यमंतराक्रत्यसाधनत्वमित्साकांक्षोदयात् साश्रयग्रहणात् क्रयःसाधनत्वमित्येतन्याये
गवत्यनेन गोः क्रयसाधनत्वेन विधानानुपपत्तिः गोद्वारा आरुण्यस्य क्रयसाधनत्वं च गोरारुण्यं विनानुपपन्न
मिति तद्विशेषणत्वलाभः तदुक्तं तन्त्रीप्रपायां तु रुणास्यैव करणत्वं क्रयं प्रति विस्पष्टं गम्यते तत्र द्रव्यद्वारैव प्रज एम॰
न इति न चारुणाया स्यस्य गुणपरत्वे स्त्रीलिंगतानुपपत्तिः गुणिद्वारा गुणस्य करणतया गुणिनोपि करणत्वना

त्वर्यशक्तिपरतया तदुपपत्तेः अत एव जातिप्रकारेण धर्मिबोधकगवादिपदानां महत्त्वमतं यथा जातावेव शक्तिः
तस्याः आश्रयद्वारा कर्मत्वाद्यन्वयः अनन्तरमाक्षेपाद्व्यक्तेः कर्मत्वलाभः तथा गुणादिप्रकारेण बोधकानां शु
क्लादिशब्दानां वैयाकरणैरालंकारिकैर्गुणादौ तद्गतजातौ वा शक्तिर्हरेव तत्र क्रियाकर्मत्वाद्यन्वय इति द्रव्यस्याक्षे
पतो लाभ इत्युच्यते तदुक्तं सकेति तच्चतुर्भेदो जात्यादिर्जातिरेव वेति एवं च तन्मते रूपादिगुणान्यहत्त्वावपि लि
ङ्गतरपरिग्रहेणोपपद्यते अस्माकं नैयायिकानां त्वाभेदानुभावबलाद्भेदानुभवानुरोधात् तत्र वाभेदस्यार्थतो ला
भ इत्यभ्युपगमात् कथं तदनुरोधाद्भेदः शाब्दधीविषय इति वाच्यं विभक्तिद्वयस्यैककर्मत्वादिपरतानियमेऽपि विनापि तयोर
भेदबोधस्यानुभवविकलतया तत्संसर्गतातिरिक्तसंसर्गतया शाब्दबोधविषय इत्यर्थः तथा च तदुपस्थापकपदाभावेऽपि
न क्षतिरिति भावः नन्वेवं विभक्तेर्वैयर्थ्यमत आह विभक्तिरिति विशेषणपदोत्तरविभक्तिरित्यर्थः साधुत्वार्थं अ
भेदान्वयबोधोपयिकाकांक्षानिर्वाहार्थमित्यर्थः अ समासे समानविभक्तिकपदयोः समभिव्याहारस्यैवाभेदान्व

४

यबोधोपयिकत्वादितिभावः अथवा प्रकृतिभूतनामपदस्य निर्विभक्तिकत्वेऽसाधुत्वात्साधुत्वार्थमितियथाश्रुतार्थ
कमेव एतेन समासानुरोधाद्विरूढविभक्तिराहित्यस्य विशेषणपदनिष्ठविशेष्यपदार्थप्रकृतिकविभक्त्यप्रकृतित्व
रूपस्यैवाभेदान्वयबोधोपयिकाकांक्षानिर्वाहकत्वस्वीकारे विशेषणविभक्तिप्रकृतित्वं च विभक्तिपूर्वत्वेन प्रति
संधीयमानत्वं तेन शोभनं दधीत्यादौ विशेष्योत्तरविभक्तिसत्त्वेऽप्यनुसंधीयमानप्रथमायास्तत्प्रकृतित्वरूपवान् घ
टइत्यादौ विशेषणपदस्य च विशेष्यवाचकपदार्थप्रकृतिकानुसंधीयमानप्रथमाप्रकृतित्वमुपपद्यते न चैवम
पि विशेषणविशेष्यपदयोः सर्वमभिन्नविभक्तिप्रकृतिकतया विरूढविभक्तिराहित्यमसमासस्थले दुर्घटवि
शेष्यपदार्थप्रकृतिकेत्यनेन विशेष्यपदप्रकृतिकविभक्तिविजातीयत्वविवक्षणे च नीलघटरूपमित्यादौ विशे
ष्यवाचकघटपदप्रकृतिकविभक्त्यप्रसिद्ध्याऽनुपपत्तिरिति वाच्यं विशेष्यवाचकपदार्थप्रकृतिकेत्यनेन न तादृशप राम
दाव्यवहितोत्तरत्वेनानुसंधीयमानायास्तत्प्रकृतिविभक्तिकधर्मवत्त्वस्य विवक्षया सामंजस्यात् वस्तुतो समासस्थले समा

नविभक्तिकत्वमेवाभेदबोधे तंत्रं न तु निरूढानुगमं रूपं तथा सति घटो नील इत्यादेरपि घटादौ नीलाद्यभेदान्वयाप
त्तेः समासस्थलानुरोधेन च विशेषणविशेष्यपदयोः अव्यवहितपूर्वापरभावस्यैव तत्त्वेन च द्वितीयादितिभ
क्तेः कर्मत्वाद्यभावे तस्या असाधुतापत्तिर्दुर्वारैव कर्मणि द्वितीयेत्यनुशासनादिति कथं विशेषणविभक्तेर्नि
रर्थकत्वोपगम इति वाच्यं विशेषणविभक्तेर्निरर्थकत्वेपि विशेषणपदस्य विशेष्यपदसमानविभक्तिकत्वा
नुशासनवशेन साधुत्वसंभवात् न चारुणया गवेत्यत्र अरुणाभेदान्वयबोधोपगमे तत्र तदभेदविधानात् क्र
यसाधनतया विधेयमानाया गोरनुवाद्यतया विधेयत्वानुवाद्यत्वविरुद्धद्वयसमावेशः तदुभयविरोधश्चोद्देश्य
तयाभासमान एव विधेयतया भासत इत्यस्य क्वाप्यदृष्टत्वात् तदिति तत्र वाक्यभेद एव साधीयानिति वाच्यं अरुण
याभेदेन विधानेपि साधनाकांक्षायां साधनतया विशिष्टायां गोर्विधाने नैव समीहितसिद्धेः विशेषणविभक्तेः
अर्थबोधकत्वमपि संभवतीत्याशयेनाह यद्वेति समानविभक्तिकयोः समानविभक्तिकपदोपस्थाप्ययोः अभेदा

१

र्थकत्वमितितथाचनीलाद्यभिन्नाभेदः प्रकारतयाघटादौ भासत इति भावः ननु प्रमेयं वाच्यमित्यादौ वाच्यत्वाद्य
वच्छिन्नाप्रसिद्ध्या तद्भेदाप्रसिद्धेर्भेदार्थकत्वविभक्तेर्न संभवति तत्तद्व्यक्तित्वावच्छिन्नभेदाभावस्य तत्तद्व्यक्तिवि
शेषणतया भाने तु भेदे तत्तद्व्यक्तित्वावच्छिन्नान्वये नैव निर्वह इति स च तेन रूपेण विशेषणादनुपस्थित्या न सं
भवति विशेषणतावच्छेदकाश्रयप्रतियोगिकभेदाभावस्य च प्रतियोगिप्रसिद्धावपि न प्रसिद्धिः वाच्यत्वाश्र
यप्रतियोगिकभेदस्य सर्वत्र सत्त्वात् तादृशभेदप्रतियोगितावच्छेदकाभावः प्रसिद्ध इति चेत् न तस्याव्यावर्तकतया प
टः कंबुग्रीवादिमानित्यादौ योग्यतापत्तिरिति मैवं स्वभेदस्य संसर्गतापक्षेपि एतद्दोषसंभवात् न च तत्तद्व्यक्तित्वा
वच्छिन्नभेदाभावस्य तत्तद्व्यक्तौ तत्तद्व्यक्तिसंसर्गतया भानं संभवति संसर्गघटकतत्तद्व्यक्तित्वानुपस्थितावपि
तद्भानसंभवादिति वाच्यं संसर्गतासर्यज्ञानस्य शाब्दबोधस्य हेतुतया तत्तद्व्यक्तित्वानुपस्थितावपि संसर्गघ एम·
टकतयापि भानासंभवात् तस्माद्भेदे न भेदाभावः अपि तु तद्व्यक्तित्वविशिष्टधर्म एव तद्भेदः तस्य च संसर्गत

येयत्प्रकारतयाभानं निःप्रत्यूहं अभेदप्रतियोगितया भासमानव्यक्तीनां विशेषणतानवच्छेदकमूर्त्तोपस्थिति
रूपेणोपभानोपगमात् तत्तद्व्यक्तित्वेनोपस्थितेरैकवृत्तिविशेषणतानवच्छेदकादिधर्मस्य तद्वृत्तित्वविशिष्टस्या
न्यत्रासत्त्वाद्भिन्नरूपेणैकरूपेण वा विभिन्नव्यक्तिद्वयपरसमानविभक्तिकपदयोर्नयोग्यता आकाशो द्वानि
त्यादौ हि त्वेन भासमानस्याकाशस्य निरुक्तभेदो यद्यप्याकाशेऽस्ति तथापि तेन रूपेण भासमानव्यक्त्यन्तरस्यावि
तत्राभेदभानान्नस्य बाधितत्वेन तद्व्यक्त्यास्य योग्यता न च तद्व्यक्तेरप्येव हि कनभाने तत्रैव योग्यताप्रसंग इति वाच्यं
पर्याप्तिसंबंधेहित्वादिव्यासज्यवृत्तिधर्मप्रकारेणायत्रैव व्यक्तिमात्र व्यक्तिभानं तादृशबुद्धेरप्रमात्वात् तज्ज्ञा
नकवाक्यस्यायोग्यत्वात् प्रसक्तेः यत्र व्यासज्यवृत्तिधर्मस्य विशेषणतानवच्छेदकमात्र तत्र तदवच्छिन्नभेदाभाव ए
वाभेदविशेष्ये भासते स च तादृशधर्म एव न स्य च विशेष्यतावच्छेदकावच्छेदेनेवान्वयात् एकमात्रवृत्तिधर्मस्य
च व्यासज्यवृत्तिधर्माधिकरणतानवच्छेदकत्वादाकाशत्वादौ वा धिन्नद्वित्वावच्छिन्नाधिकरणत्वावगाहनेन

काशोद्वाविस्यादिवाक्यजन्यबुद्धेर्न्नमत्वनिर्वाहइत्याहुः एतन्मतघटेन नीलइत्यादेः नानिरूढाभेदाभाव एवप्रसा
प्यतेइतिसंसर्गाभाएवनञोर्थः समासस्थलेचाभेदः संसर्गतयैवभासते तदर्थकविभक्तिविरहात् मतद्वयेएव
नीलोघटइत्यादौसमानविभक्तिकपदयोरभेदविषयकत्वान्वयबोधआकांक्षामुपपादयति अत इति समानविभ
क्तिकपदोत्तरमेदानभवयोग्यत्वादित्यर्थः विशेषणविशेष्यभावानुभावकत्वमिति विभक्त्यर्थद्वारा अभेदसंबंधे
नसाक्षाद्वानीलघटादीनां विशेषणविशेष्यभावेनान्वयानुभावकत्वमित्यर्थः तत्पदयोः तादृशनीलघटादिपदयोः
परस्परंविना नतादृशपदयोः तादृशान्वयानुभावकत्वाभावः परस्परव्यतिरेकप्रयुक्त इति समुदायार्थः अथ
विभक्त्यर्थाभेदनिवेशेमतेतदन्वयेविशेष्यपदस्यविशेषणपदसमानविभक्तिकत्वनापेक्षतेगृहोः।धीरधान्येन
धनमित्यादौषष्ठीतृतीयार्थाभेदस्यप्रथमान्तपदार्थेऽन्वयात्तथाचनीलोघटइत्यादाविवनीलः घटइत्यादावपि एम॰
द्वितीयार्थाभेदस्यघटादावन्वयप्रसंगइतिचेन्न अभेदस्यसंसर्गतामतेतत्संसर्गकबोधेसमासातिरिक्तस्थले

समानविभक्तिकयोरेवाकांक्षाविभक्त्यर्थभेदमन्तेच तृतीयाषष्ठीभ्यामिव विभक्त्यंतरेणाभेदबोधनेऽपि समानविभ
क्तिकेनैवासमानविभक्तिकेनापि पदेन तदाकांक्षापरं तु षष्ठीतृतीयातिरिक्तविभक्तेः सजातीयविभक्तिरहितत्व
विशेष्यपदसमभिव्याहारे साधुता अनुशासनविरुद्धत्वात् अतो नीलं घट इत्यादयो न प्रयोगाः न चैवं षष्ठीतृ
तीययोरपि साधुता तज्जातीयविभक्तिरहितविशेष्यपदयोगे न स्यात् विशेष्यविशेषणपदयोः समानविभ
क्तिकत्वानुशासनविरोध इति वाच्यं विशेष्यपदे षष्ठ्यादेरसत्वेऽपि विशेषणपदोत्तरं षषे. तत्प्रयोगात् अत्रतत
स्यापि तद्विधायकानुशासनस्य कल्पनीयत्वात् मीमांसकमते द्वारमित्युक्ते अध्याहृतपिधानादिना द्वारे कर्मत्वा
न्वयबोधात् पिधानोपस्थापकपदाभावेऽपि तदुपस्थापकानुमानादिनाऽश्रुतपदस्याकांक्षेति येनेत्यत्र पदत्वाविवक्षाभिप्राये
ण दर्शयति द्वारमिति अध्याहारं विनापि पिधानोपस्थापकानुमानादिव्यतिरिक्तप्रयुक्तं स्वार्थान्वयानुभावकत्वमश्रुतपदस्य स्वा
र्थान्वयबोधकत्वाभावे अनुत्वामिति तदानदाकांक्षेत्यग्रिमेणान्वयः अतः — न पदेन तादाकांक्षेत्यर्थः अनुमानादिविरह

स्यान्वयबोधप्रयोजकत्वहेतुतया ऽप्रतियोग्यत्वाभावादिति अत्राप्यध्याहार इति नेति काकाक्षिन्यायेन संबध्यते तथाचा
नुमानादिकं विना अन्वयप्रतियोगिविधानाद्यनुपस्थितेरित्यर्थः तथापि धानोपस्थापकानुमानादेः शाब्दबोधाजनक
त्वेपि तज्जनकान्वयप्रतियोग्युपस्थितिजनकत्वेन तदुपयोगितया न क्षतिरेकस्मान्वयानुपधानप्रयोजकत्वमप्याहत
मिति भावः अनुमानादेरन्वयानुभवाजनकतया तस्यानुपधानस्वभावत एवेति तत्र श्रुतपदाकाङ्क्षाविरहेपि न क्षतिः
अननुभवजनकपदनिष्ठाकाङ्क्षाया एव शाब्दबोधोपयोगित्वादित्याशयेन पदे एवाकाङ्क्षासत्वमुपपादितेन तद्विषया
श्रुतानभिप्राये त्यादि चयपयेति यस्य तद्युत्राकाङ्क्षासंत्वं तेन स्यारं तदुपस्थितिपरं वान अपि तज्जन्योपस्थितिपरं तदापस्मतेऽनु
मानादिजन्यार्थोपस्थितेरपि शाब्दबोधजनकतया तन्निष्ठं तज्जनकत्वसहकारिविरहप्रयुक्तमिति पिधानोपस्थाप
कानुपदने पिपदाकाङ्क्षा उपपद्यते इत्यवधेयं लौकिकस्थले अध्याहृतार्थान्वयबोधप्रयोजकबोधोपयिकाकाङ्क्षाश्रुत राम
पदेमध्यपदं अतो वेदस्थलेपि तत्र जात समर्थयति विश्वजितेति समभेदं कार्यमिति विश्वजिद्यागः स्वर्गकामकार्य इत्यर्थः

इति इत्याकारकं ज्ञानं नाधिकारिणं विनेति अधिकारित्वेनान्वयप्रतियोगिनः स्वर्गकामपदस्योपस्थापकमनुमानादि
कं विना ज्ञानानुपधायकत्वस्यानुपपत्तेरित्यर्थः तदाकांक्षाप्रयुक्तपदजातदृशानुमानाकांक्षा स्वर्गकामत्वेनाधिकारिणो
बोधोपि न साकांक्षात् सचर्तकिः स्वकर्तव्यताज्ञानस्यैव प्रवर्त्तकत्वान्न तादृशज्ञानेन शाब्दबोधरूपं प्रवर्त्तनीयपुरुषाणां वि
शेषणं तो विधिवाक्यार्थेतर्भवि वाक्यभेदादिप्रसंगात् तथा च स्वर्गकामत्वेनाप्यधिकारिणोऽनुमानादेव बोधो भवतु
किं तस्यानुमानोपस्थितस्य शाब्दबोधे यगमेनेत्याशयेनाह यद्वेति कर्त्तुरिवेति पचतीत्यादाविस्यादिः दृष्टांतोयन्यायम
ते कर्तृवाचकस्तुत्यानस्य चानुभावकत्वपक्षे गोवाहीकः गंगायां घोष इत्यादौ गोत्वगंगादिपदलाक्षणिकगंगादि
पदयोरज्ञानस्य च स्वभावतोऽननुभावकतयापक्षेति पत्यदस्य लक्ष्यपदपरत्वेन ज्ञानपरत्वे च नाकांक्षावत्वं निर्व
हतीति गोत्वादिपदजन्योपस्थितिसहकारेण तदर्थान्वितस्वार्थाननुभावकसमभिव्याहृतशक्यपदे तत्पदसाकांक्ष
त्वं तद्विशेषाद्बोधोपयोगीत्याशयेन दर्शयति गौणेति यन्मते शक्तिरनुभवजनकतावच्छेदिका से न च वृत्तिस्तन्म

12

क४

तेगोत्वादेरनुभवजनकतावच्छेदकशक्तिविरहेणानानुभवजनकत्वसंभवइति अननुभविकत्वं यन्मते च शक्तिर्नज
नकतावच्छेदिका अपि तु पदत्वेन ज्ञानत्वेवा यन्मते शक्तिरेव कारणतावच्छेदिका वृत्तिस्तु शक्त्यंतरं तन्मते अवाचका
दवृत्तिरूपशक्तिविरहे पि शाब्दानुभावजनकत्वेन विचारसहमिति पक्षद्वयसाधारणं तदुपस्थापितस्य गोत्वादिपदोपस्था
पितार्थस्यनानुभावकत्वं अनुभाव्यत्वाभावो वा चकपदे इतरपदं विना गोत्वादिपदव्यतिरेकयुक्त इत्यर्थः अध्याह
तस्यवेति अथ अध्याहृतार्थविषयकानुभवजनकत्वाभावः श्रुतपदेऽध्याहारविरहप्रयुक्त इत्यर्थः ननु समानविभक्ति
कनामपदयोरभेदान्वयप्रयोजकत्वात्तदानीं नीलोघट इत्यादितव घटः कर्मत्वमित्यादितोपि अभेदान्वयो भवतीत्यत आ
ह सजातीयेऽन्वयदर्शनमिति विशेष्यसजातीये विशेषणसजातीयस्यान्वयदर्शनं दृश्यमानोऽन्वयः प्रकृतसंसर्गः
योग्यतातद्विशेष्ये तद्विशेषणस्यानेन संबंधेनान्वयबोधोपयिकयोग्यते त्यर्थः पयसा सिंचतीत्यादौ सेकत्वादिनासे राम·
कादिसजातीये पयःकरणकत्वादिना पयःकरणकत्वादिसजातीयस्याप्यत्वादिसंसर्गस्य सत्त्वात् योग्यतानिर्वाहः

वह्निनासिंचतीत्यादौ क्वचिदपि सेकादौ कस्यचिदपि वह्न्यादिकरणकत्वस्य संसर्गाभावाद्योग्यतायोग्यतायाः
स्वरूपसत्त्वेन शाब्दबोधोपयोगिताभ्युपगमेपि योग्यताभ्रमाच्छाब्दबोधोदयाद्योग्येपि अयोग्यताभ्रमदशायां योग्य
ताज्ञानाभावेन शाब्दबोधानुदयात् अपि तु ज्ञायमानाया एव तथात्वमतः तद्वत्ताभावे दर्शिताभिधानेन ज्ञानं च कारण
तावच्छेदकतया व्यधिकरणतया वा अन्वयबोधे उपयुज्यते विशेष्यविशेषणयोः सजातीयत्वं विशेष्यताविशेषण
तावच्छेदकावच्छिन्नत्वं तन्निवेशात् यद्व्यक्तेः यद्व्यक्तिसजातीयस्य वा यद्व्यक्तिसजातीयत्वाय व्यक्तेः संबंधो न गृ
हीतः तत्रापि तच्छाब्दबोधोत्पत्तिः विशेष्यतावच्छेदकावच्छिन्नविशेषणतावच्छेदकावच्छिन्नस्य तत्संसर्गग्रहदशा
तत्र व्यक्तित्वादिना तयोः संसर्गग्रहः विषयत्वेन वा शाब्दबोधापत्तिः तथा च तद्धर्मावच्छिन्नविशेष्यकतद्धर्मावच्छिन्न
प्रकारकतत्संसर्गकशाब्दबोधे तादृशज्ञानं [illegible] हेतुरिति पर्यवसितं विशेष्ये विशेषणं वैशिष्ट्यनिवेश्यतद्वि
शेष्यसद्विशेष्यसजातीये तद्विशेषणसजातीयस्य प्रकारसंसर्गकज्ञानं तादृशज्ञानं हेतुर्नोपेयतेऽसाजात्यस्य घटक

13

विशेष्यतावच्छेदकादेर्विशिष्य निवेशस्यावश्यकत्वात्तद्विशेष्यादिनिष्ठत्वेन तत्तद्धर्म्मवगाहिज्ञानत्वेन हेतुतायां
वृहत्तरकार्यकारणभावाधिक्यादवच्छेदकगौरवान् गुर्वी गृहीतविशेष्यव्यक्तौ तादृशविशेषणव्यक्तेः स्मृत्वो
धानुपपत्तेश्च यत्र विशेष्यतावच्छेदकावच्छिन्नस्यान्वयो भूतः विशेष्ये तज्जातीयत्वं योग्यजेति सांप्रदायिका व्या
चक्षते तन्न तथा सति विशेष्यतावच्छेदकावच्छिन्ने विशेषणसंसर्गग्रहदशायां रूपांतरावच्छिन्ने विशेष्ये विशेष्यता
वच्छेदकरूपावच्छिन्नेपि च विशेषणसंसर्गजातीयत्वस्य ग्रहसंभवान्स्मावोधापत्तेः यदि च तद्धर्मावच्छिन्ने तदसंसर्ग
ग्रहदशायां तद्धर्मे तद्वृत्तित्वाग्रहे विशेषणवद्वृत्तितद्धर्मवत्त्वरूपविशेषणवज्जातीयत्वानुपपत्तिरिति उच्यते तत्
दापि गौरवं दुर्वारमेव तादृशयोग्यतापेक्षया विशेष्यतावच्छेदके विशेषणवद्वृत्तित्व विशेष्यतावच्छेदकवत्ति विशेष
णवत्त्वस्य च लघुत्वात् अपूर्वविशेषणविशेष्ययोः संसर्गबाधानुपपत्तेर्यथाश्रुतसाजात्यघटकं रूपं विशे राम •
षणोऽनिविष्टं निविष्टं त्वतिरिक्तं नाकश्यमेव दूषयति यथा कथंचित्साजात्यस्येति येन केनापि रूपेण साजात्यस्यत्व

र्थः अभ्यावर्तकत्वादिति वह्नित्वानास्ति च तादात्म्ययोग्यस्थलेऽपि प्रमेयत्वादिनावह्निकरणकत्वाभद्दाहादिसजातीयत्व
स्यासेकादौ तेन रूपेणासेकादिसजातीयत्वस्य च तादृशदाहादौ सत्त्वेनायोग्येऽतिप्रसंगवारकत्वादित्यर्थः पदार्थतावच्छे
दकेनेति अन्वयितावच्छेदकरूपेणेत्यर्थः अन्यजात इति जातत्वावच्छिन्नेऽन्यतः स्वात्मिन्नेव पयःपानकर्तृकदर्शन
संभवेनान्येनेत्युक्तं अभावादिति अन्वयितावच्छेदकान्यजातत्वावच्छिन्ने पयःपानकर्तृकसंसर्गो न दृष्टः तादृशचै
त्राद्यवच्छिन्नस्य संज्ञा अन्यजातेति तेन चैत्रत्वादिरूपमन्यजातत्वं पदार्थतावच्छेदकमेवेति उक्तावपि न प्रतीकारः य
त्र पदार्थतावच्छेदकं भूतलत्वादिकमेव घटादिविशेषणान्वयितानवच्छेदकं तत्रायुक्तयोग्यतानिश्चयस्य शाब्दबोधा
त्पूर्वं नियमतोऽघटतान्यथायोग्यताज्ञानादेरभ्रहसादिकार्यनिर्वाहे शाब्दप्रामाण्यं विनोपपत्तेरित्याशयः वाक्यार्थ
स्येति विशेष्यतावच्छिन्ने विशेषणतावच्छेदकावच्छिन्नवत्त्वस्येत्यर्थः अपूर्वत्वात् शाब्दबोधात्पूर्वं नियमतो निश्चयस्या
भावात् एतद्दूषणमुक्तयोग्यतायां निश्चयोऽहेतुश्चेदुच्यते तेन तदभिप्रायेण संशयपक्षधारणान ज्ञानहेतुत्वोपगमपुन

हृत्तैव योग्यतानसाधीयसीति बोध्यं समभिव्याहृतेति निरुक्तपदार्थप्रतियोगिकतत्संसर्गकव्याप्यधर्मकत्वं तत्पदा
र्थीयतत्संसर्गयोग्यतेत्यर्थः तादृशयोग्यतायाज्ञानं तत्र धर्मितानिरुक्तपदार्थस्यैतेन संबंधेनान्वयबोधः धर्मिता
प्रकृतसंसर्गस्यैव वाक्यार्थतया शाब्दबोधांशगुरुत्वेयत्तानतुगुरुव्याप्यधर्मस्येत्याशयः वाक्यार्थस्येति प्रकृतसंसर्ग
व्याप्यवत्ताज्ञानस्य प्रकृतसंसर्गानुमितिहेतुतया तस्य शाब्दहेतुत्वे सर्वत्र शाब्दबोधास्थले तदनुमितिसामग्रीसत्वेन
तस्य सर्वत्रानुमेयशाब्दसामग्र्या बलवत्त्वान्न संसर्गानुमितिरुपपत्तिरिति ध्येयं शाब्दबोधपदार्थस्य संसर्गमर्याद
याभाने न संबंधसंबंधावगाहि संबंधविधेयकानुमितिहेतुसंबंधव्याप्यवत्ताज्ञानघटितसामग्र्यास्तु न विषयक
तादृशशाब्दसामग्र्यपेक्षया बलवत्त्वात् अथवा सर्वत्र संसर्गानुमितिसामग्रीसत्त्वेऽनुमानादिव्याप्रवृत्त्यादिनिर्वा
हेन शाब्दप्रामाण्यानुपपत्तिरित्येवार्थः ननु संसर्गव्याप्यधर्मत्वेन तादृशधर्मत्वेन ज्ञायमानत्वं येन तादृशयोग्यताया
ज्ञानघटिताया अपेक्षायां शाब्दधीपूर्वं अनुमितिसामग्रीनैयत्यं स्यात् अपि तु वास्तवतादृशधर्मत्वमेव योग्यतास

राम

पिस्वरूपसत्त्वेन हेतुर्न तु तज्ज्ञानायेन गभीर्याश्चपि तस्याज्ञानापेक्षायाउक्तदोषः स्यादिति शंकां निरस्यति न चेति
योग्यताभ्रमादिति यद्यपि स्वरूपसत्स्वेव योग्यताहेतुत्ववादिना योग्यताभ्रमस्य शाब्दबोधहेतुत्वानंगीकारात् यो
ग्यताभ्रमाच्छाब्दभ्रमो नोपेयत इति तदनुपपत्तिप्रदर्शनं तत्संगच्छते तेनथापि शाब्दभ्रमे। योग्यताभ्रम एवानुगत
दोषो हेतुर्वाच्यः दोषान्तराणामननुगमात् तथा च स्वरूपसद्योग्यतासामान्यकारणविरहे योग्यताभ्रमाधीनः
शाब्दभ्रमो न स्याद्योग्यताभ्रमस्थले स्वरूपसद्योग्यतासत्वाद्यसत्कैरित्याशयः केचित्तु शाब्दभ्रमस्थले योग्यता
ज्ञानस्य भ्रमत्वेन सर्वसिद्धतया भ्रमत्वस्य विषयबाधाधीनतया स्वरूपसद्योग्यतास्थले स्वरूपसद्योग्यतायाश्च
सत्वादित्येव योग्यताभ्रमादित्यस्यार्थ इति तु नासंगतिरित्याहुः तदसत् योग्यताज्ञानस्यसाधारणिमग्रंथेन विरोधा
त् अन्वयनिश्चयविरहस्वरूपसतो हेतुत्वशाब्दस्थलेपि तत्सत्वेन शाब्दभ्रमानुपपत्तिविरहेणात एवेत्यस्य शा
ब्दभ्रमानुपपत्तेरित्यर्थकत्वासंगतत्वकृतेरित्याशय यथाश्रुतग्रन्थाव्यापंत्वन एवेत्यस्य शाब्दभ्रमो योग्यताभ्रमाधी

नत्वानुपपत्तेरेवेत्यर्थः भ्रमेप्यनन्वयनिश्चयविरहस्य प्रतिबंधकाभाववतया स्वरूपसत एव हेतुत्वेन तस्य योग्यतात्वे
योग्यताया भ्रमात्मकत्वानस्याद्भ्रमहेतुत्वासंभवाद्यास्तमित्यत्र हेतोरसंगतिः अतः अन्वयनिश्चयो विशे
ष्यविशेषणाभाववनिश्चयः स च यद्विशेष्यकयद्विशेषणकस्थले प्रसिद्धः तत्रैव तद्विरहरूपायोग्यताहेतुः सर्व
त्र भ्रमे मानाभावेन यादृशस्थले विशेष्ये विशेषणाभावभ्रमो प्रसिद्धिः तदभावरूपयोग्यताया अप्रसिद्ध्या हेतु
त्वासंभवेपि न क्षतिः एतादृशयोग्यतायाः कारणतासाधकमेतद्विरहस्य कार्याभावप्रयोजकत्वमिति धर्मिणी
ति शेषः तत्प्रकारकेत्यत्रापि तत्रैवानुपपत्तेराद्यज्ञानानुदयादिति तात्पर्याभाववता न काले समानधर्मिकपरोक्षवि
शिष्टबुद्ध्युत्पादस्य सर्वानुभवसिद्धत्वादिति भावः समभिव्याहृतेति धर्मिणीत्यस्य तत्पदार्थसंसर्गाभावव्याप्यधर्माभा
ववत्तत्र तत्पदार्थयोग्यत्वेनेत्यर्थः वह्निना सिंचतीत्यादौ सेकादौ विशेष्ये वह्निकरणकत्वादिरूपविशेषणाभाव
व्याप्यसेकत्वादिसत्वान्न तदभाव इति नातिप्रसंगः संसर्गाभावाप्रसिद्धेरिति विशेषणतावच्छेदकतादात्म्यसं

राम०

वंधावच्छिन्नाभिधेयत्वाद्यवच्छिन्नविशेषणाद्यवभिधेयत्वाद्यवच्छिन्नाभावाप्रसिद्धेरित्यर्थः तदनिरूपणादिति तद्व्या
प्यधर्मशून्यत्वतत्प्रयोज्यत्वाप्रसिद्धेरित्यर्थः गृहनिष्ठयत्नाभावे घटे गेहाधिकरणकेसत्ताभावेप्रमितेनिश्चि
ते घटो नास्तीत्यस्य गेहहृदस्यादिः तन्निश्चये पि गेहसत्त्वरूपविशेषणाभावव्याप्यधर्मेतदन्यत्वरूपयोग्यतायाः
तदभावनिश्चयस्य तदभावव्याप्यधर्माभावज्ञानानप्रतिबंधकत्वेन तन्निश्चयदेशायास्तादृशयोग्यताज्ञानसं
भवादितिभावः अन्वयज्ञानानुदयात् घटे गेहास्तित्वज्ञानानुदयात् तथा चोक्तज्ञानहेतुतत्तयातत्रान्वयवोधाभा
वानिर्वाह इति नोक्तस्य योग्यतात्वमिति भावः बाधकप्रमात्वप्रभाव इति प्रकृत विशेषणसंसर्गनिष्ठाविशेष्यवृ
त्यभावप्रतियोगित्वप्रमाविशेष्यत्वाभाव इत्यर्थः विशेषणसंसर्गविशेष्यनिष्ठाभावप्रतियोगित्वग्रहे विस
ति तत्राप्रामाग्रहे विशिष्टवुद्ध्यसत्त्वाबाधनिश्चयविधयातत्तादृशप्रतियोगित्वप्रमाविषयत्वग्रहएव विशि
ष्टग्रह विरोधीति तादृशप्रतियोगित्वाभावमुपेक्ष्य तत्प्रमाविषयत्वरूपबाधेनत्वाभावानुधावनं प्रत्युतदुष्टा

16

तानंशावछीविरोधितत्तज्जदभावस्ययोग्यत्वौचित्यात् अतोऽन्यनिष्ठतादृशप्रमाविषयत्वस्यप्रकृतसंसर्गनिष्ठत्वाद
शाप्रमाविषयत्वस्य अन्यनिष्ठत्वाद्यविशेषिततादृशप्रमाविषयत्वस्याऽभावोविवक्षितःतत्रप्रथमपक्षेऽतिप्रसंगमा
हान्यत्रेतिप्रकृतविशेष्यवाधितविशेषणसंसर्गातिरिक्तवत्त्वनीत्यर्थः वाधकंतादृशप्रमाविषयत्वेअयोग्येपीतिस
कादिरूपविशेष्यवह्निकरणकत्वासंसर्गादावपीत्यर्थः द्वितीयंपक्षंदूषयतिनापीतिप्रकृतसंसर्गेतिप्रकृतविशेषण
संसर्गनिष्ठंपक्षाधितत्वंतदभाववत्त्वसंसर्गनिष्ठमित्यर्थः तथाचवह्निकरणकत्वादिसंसर्गनिष्ठस्यसेकादिवाधितत्वस्य
संसर्गेऽसत्वाद्व्याप्तिरितिभावः प्रतियोगीतिपयसासिंचतीत्यादियोग्यस्थलेप्रकृतपयःकरणकत्वादिविशेषणसं
सर्गनिष्ठयत्सेकादिनिष्ठाभावप्रतियोगिप्रमाविशेष्यत्वरूपंप्रतियोगितत्वस्यप्रसिद्धत्वप्रसिद्धेवतत्रतदभावव्याप्यतादित्य
र्थः तथाचलक्षणेऽसंभवइतिभावः तृतीयंपक्षमाशंक्यनिराचष्टेनचेतिअन्यत्रप्रसिद्धस्यप्रकृतसंसर्गातिरिक्तगोचरत्वा राम॰
देप्रसिद्धस्येत्यर्थः तथाचनप्रतियोग्यप्रसिद्धिरितिभावः वाधकप्रमाधिकरणविशेषणनिष्ठत्वाविशेषितनिरुक्तवाध

कप्रमाविषयत्वस्यप्रकृतसंसर्गस्येतिवाक्यार्थरूपस्येतिशेषः ननुप्रकृतविशेष्यविशेषणयोर्मेयरूपत्वे एवप्रकृ
तसंसर्गः शाब्दबोधप्रागप्रतीतेः कृतयोग्यताशरीरेचतादृशविशेषणमात्रोपरक्तःप्रकृतसंसर्ग एवनिविशते
तथाचनतद्घटितयोग्यतायाः प्रथमतोऽज्ञेयत्वमतआह अयोग्येपीति अन्यनिष्ठत्वस्यप्रमाविषयत्वविशेषण
त्वेविशिष्यनिष्ठतादृशप्रमाविषयत्वाभावस्यापितादृशप्रमाविषयत्वप्रतियोगिताकाभावत्वयातमादायबाधि
तसंसर्गेविनिरूक्तयोग्यतासत्त्वादितिव्याप्तेरित्यर्थः अयोग्यस्थलेप्रकृतविशेषणसंसर्गविशेष्यनिष्ठाभावप्रति
योगित्वप्रमाविषयत्वत्वावच्छिन्नाभावनिवेशेनदोषइतिगूढाभिसंधिरित्याशंकनेनैवेतिप्रयोगासंसर्गेऽपिदैव
याऽज्ञः बाधकंतादृशप्रमाविषयत्वंउक्तंआशयमबुद्ध्वा अन्यनिष्ठस्यतादृशप्रमाविषयत्वस्यअयोग्येपिसंसर्गसत्त्वे
नेयप्रकृतसंसर्गनिष्ठत्वसत्त्वात्नशाब्दप्रमेतितदभावस्येवयोग्यतात्वंशङ्कितमित्यभिमानेनतादृशाशंकादोषंप्रका
शयन्नपूर्वोक्ताप्रसिद्धिदोषमेवउन्नतस्यसंदूषयतितर्हीतिप्रकृतसंसर्गबाधस्याभावः प्रकृतसंसर्गनिष्ठबाधकप्रमावि

17

षयत्वस्याभावः स च तादृशाभावश्चाप्रसिद्ध एवेति योग्यतासंसर्गस्थल इत्यादिः अयथाभावरूपविरोधिनोऽप्रसिद्धे
तत्र प्रतियोगिमत्त्वज्ञानेऽभवत्तु बाधकविरहादित्यत आह अत एवेति प्रतियोग्यप्रसिद्धेर्वाप्रसिद्धेरित्यर्थः तत्र बा
धकस्याप्यनिरूपणात्तमिति योग्यसंसर्गनिश्चबाधकस्याज्ञानमित्यप्रतियोगिप्रसिद्धेनैवाभावप्रसिद्धेर्वप्रतियो
गिनो ज्ञेयतानियमादिति भावः विशेषणसंसर्गविरहो घबाधितत्वाभावस्य योग्यतात्वं निराकृत्य विशेष्ये विशे
षणसंसर्गबाधकाभावस्य तत्त्वं निराकरोति नापीति इतरपदार्थसंसर्गेति प्रकृतविशेषणसंसर्गेत्यर्थः अपर
पदार्थविशेष्ययोग्यत्वेन विवोधः केवलान्वयिनीति यत्र विशेषणसंसर्गः केवलान्वयी न तत्र तदभावाप्रसि
द्ध्याऽव्याप्तिरित्यर्थः एतेनेति केवलान्वयिनि प्रतियोगिनोऽप्रसिद्धत्वेनेत्यर्थः यत्र विशेष्यस्य संबंधग्राहकप्र
माणं नास्ति यस्य विशेषणस्य संबंधग्राहकं नकं प्रमाणं संजन्यप्रमाविशेष्यत्वसंबंधेन संसर्गीति तन्निवेशे स्पयो राम·
ग्यं तद्विशेषणयोग्यं पूर्वप्रमायाअभावः इदप्रमाकरणस्याभावो योग्यतेति भेदः यत्र यस्य संबंधग्राहकं संबं

धविषयकोग्रहः प्रमाणं नास्ति प्रमानमवतीत्यर्थः बोधनीये ति एकपदार्थबोधनीयेर्थेऽपरपदबोधनीयार्थसं
सर्गाभावप्रमाविरह इत्यर्थः पूर्वपदार्थस्य पदार्थतावच्छेदकरूपेणानिवेशः इदानीं तु तत्तत्पदबोधनीयत्वेनेति वि
शेषः प्रतियोग्यप्रसिद्धेरिति केवलान्वयिविशेषणतं वं धत्वलक्षणादिः दूषणान्तरमाह बोधनीये त्निति तत्पदजन्य
शाब्दबोधात्पूर्वं तत्पदजन्यशाब्दबोधविषयत्वरूपतत्पदबोधनीयत्वविशेषितार्थे परकसंसर्गज्ञानासंभवादि
त्यर्थः न च तादृशसंसर्गस्य ज्ञानेऽपि स्वरूपसंबन्धेन योग्यतावला नशाब्दबोध उपपत्स्यत इत्यत आह योग्यतां चेति स्वावे
दित मिति तथा सति शाब्दभ्रमस्य योग्यतान्त्रमाधीनत्वनिर्वाहो न स्यादित्युक्तेत्यादि दूषणान्तरमाह योग्यते ति त
त्तत्त्वस्य एकपदबोधनीये अपरपदबोधनीयसंसर्गाभावप्रमाविरहस्य विशेष्ये विशेषणत्वं संसर्गाभावप्रमारूपबा
धकप्रमाविरहस्य योग्यतात्वपक्षे बाधकान्तरमाह अपि चेति स्वीयत्वं प्रमाविशेषणं स्वीयशाब्दबोधसंमवायी पुरु
षः अयोग्येपीति अयोग्येऽस्वरीयबाधकप्रमायाः संदेहासत्वेन यतनस्वरूपीयबाधकप्रमाविरहस्य दशा विशे

षेसोऽलम्बेन योग्यताप्रसंगादित्यर्थः तथा च योग्यताप्रमाधीनत्वं शाब्दप्रमस्य नोपपद्यत इतिं अर्थः बाधकप्रमाया
मान्याभावयोग्यतात्वपक्षे नायं दोष इति तत्पक्षे दोषमाह तान्नं निश्चेतुं अशक्यत्वादिति यात्र्यसंदेहदशायां याश्या
भावस्येव परंषीपथान्स्याभावादिप्रमाया अपि विशेष्यादौ संदिग्धत्वादिति भावः इदं तु योग्यतानिश्चयहेतुतापक्षे
दूषणं संशयसाधारणहेतुतामालम्ब्य विशेषणसंसर्गनिष्ठबाधकप्रमाविषयत्वाभावस्य योग्यतात्वं किंतु तद्विष्य
ते योग्यानुपलब्ध्या बाधकप्रमासामान्याभावो निश्चय इत्याशंकां निरस्यति परप्रमाया इति अयोग्यत्वादित्यत्रापि प्र
त्यक्षासंभवादित्यर्थः तथा च योग्यानुपलब्धेरेव न संभवतीति भावः स्वीयेति अयोग्यस्येत्यादिः अयोग्यताभ्रमे
ऽपीति स्वरूपसंबंधयोग्यताया असत्त्वेनेत्यर्थः योग्यानुपलब्धिविरहेण बाधकप्रमासामान्याभावस्य प्रत्यक्षासंभवेप्यनु
मानान्निश्चयसंभवेन तु शाब्दबोधानुपपत्तिरित्याशंकते अन्यथेति द्रव्यत्वाश्रितजलादौ सेककारणत्वादि
बाधकाभावोऽनुमेय इत्यर्थः सेकाधिकेति सेककारणत्वशून्येत्यर्थः बाधकसत्त्वेन सेककारणत्वबाधकप्रमाविष राम

यत्वसत्वेनव्यभिचाराद्द्रव्यत्वरूपहेतोस्तादृशप्रमाविषयताभाववत्पक्षसाध्यव्यभिचारात्तथा च विशेषदर्शी
नेनोक्तहेतुकानुमानस्य भ्रमत्वे ऽप्युपजीव्यत्वेन बाधकप्रमाविरहज्ञानोपजीव्यज्ञानकत्वेन तस्यैवान्वयप्रयोज
करूपस्यैवयोग्यताज्ञानत्वापत्तेः शाब्दधीहेतुतापत्तेः इष्टापत्तिशंकां निरस्यति नचैवमिति एवमेवान्वयप्रयोजकरू
पस्यैव योग्यतात्वमित्यवस्थितिरिति शेषः आकांक्षेति अनाप्तोक्तवाक्ये स्थिरजलपयसा सिंचतीत्यादिवाक्ये वा
धानवतान्वयबोधस्येष्टरूपाबाधकप्रमायामिति प्रसक्तिमिति शेषः आवश्यकत्वादिति योग्यतान्तरस्य न हेतुत्ववा
दिना विशिष्टीकरणीया हेतुताकत्वादित्यर्थः ते च बाधकप्रमाविरह एव पुंलिंगशब्देन तस्य प्रक्रान्तत्वेपि स्त्रीलिंगयोग्य
योग्यतापदेन सामानाधिकरण्यात्स्त्रीलिंगता न च्छ्रदस्य शैत्यं हि नस्ताप्रच्छति जलस्येति वह्निशेषाणां संसर्गाभावप्र
माविरहस्य केवलान्वयित्वविशेषणाकस्थले प्रतियोग्यप्रसिद्ध्या पूर्वपक्षग्रंथे दूषितत्वेपि बाधकप्रमापदेन दोषह
त्याशयेन बाधकप्रमाविरहस्यैव योग्यतात्वसिद्धांतप्रतिबाधके ति पूर्वोक्तदोषोद्धारं स्फुरयति साचेतिमा दृशी ना दृश

योग्यताचेत्यर्थः अत्र तत्पदस्य पुंलिंगाभावपदसामानाधिकरण्येपि नपुंसकलिंगतात्पदार्थस्य विशेष्य
त्वेन विवक्षितत्वात् विशेषणपदेऽव विशेष्यसमानवद्लिंगताया नियतत्वात् ननु विशेष्यपदे विशेषणा
सशनलिंगतायाः कारकवत्प्रकारस्यादर्शनात् हि वयोग्यतेत्यत्र तत्पदार्थस्य योग्यतापदार्थविशेषणा
त्वेनैव विवक्षिता विशेषणविशेष्यभावे कामचारात् तदित्यपदार्थसंसर्ग इति विशेषणसंसर्ग इत्यर्थः स्वस्यचा
भावेऽन्वयोनुपपत्तियोगिनिश्चितो नाप्रतिहितिरित्यनुपदस्फुटयिष्यति अपरपदार्थविशेष्यं विशेष्ये च तत्तद्व्य
क्तित्वेन प्रवेशः कार्यः ननु विशेष्यरूपेणान्वितोति प्रसक्तौ विशेष्यतावच्छेदकसामानाधिकरण्येन विशेषण
संसर्गेण तदन्वयपरवाक्ये विभिन्नधर्मिषु विभिन्नविशेषणान्वयबोधे च योग्यतानिर्वाहः एवं च विशेषणस्या
पि तत्तद्व्यक्तित्वेन निवेशः ननु विशेषणतावच्छेदकरूपेण विशेषणतावच्छेदकाक्रान्तैकव्यक्तिनिष्ठस्य विशे राम
ष्यनिष्ठाभावप्रतियोगित्वप्रमाविशेष्यताभावस्य बाधितविशेषणव्यक्तियोग्यतात्वविरहात् तथा च तत्तद्व्य

क्तिप्रतियोगिकप्रकृतनिष्ठतत्तद्व्यक्तित्वस्याभावः तद्व्यक्तौ तेन संबंधेन तत्तद्व्यक्त्यन्वययोग्यतेत्यर्थः धर्मितावच्छिन्नस्या
पि संसर्गस्य द्वित्वाद्यवच्छिन्नाभावविशिष्टाभावमादाय दोषो भावे प्रतियोगिवैयधिकरण्यविशेषणेन वारणीयः अ
न एव यत्राव्याप्यवृत्तिसंयोगादिसंबंधस्य शाब्दधीविषयः तत्र योग्यतानिर्वाहः संयोगस्य तत्रालंबन घटवद्भूतलमि
त्यादौ नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नतया तत्र भूतलादौ घटादेः साक्षादनन्वयात् तादात्म्यसंबंधेन घटादिसंबं
धिन एवात्र विभक्त्यर्थप्रतीत्यादौ आख्यातोपस्थापितवृत्त्यादिरूपस्याधारस्यकाख्यादौ अन्वयस्थले भूतलं घटव
दित्यादावपि मत्वर्थपारतन्त्र्येण घटादेर्भूतलादावन्वयबोधोपगमे च संबंधस्य संबंधताबोध्यात्रथ समवायैक
मते वाय्वादावपि समवायेन रूपान्वययोग्यतापत्तिः रूपादिप्रतियोगिकत्वविशिष्टसमवायाभावस्य काष्ठादौ सत्त्वे
पि लक्षणाघटकत्वात् प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यस्य लक्षणाघटकत्वे चोक्तस्थले सं
योगसंबंधेन योग्यतानिर्वाहः विशेषणतासंयोगस्य विशेषणाद्भिन्नत्वविशिष्टस्य विशेष्ये विशेष्यप्रतियोगिव्यधिक

रणाभाववत्त्वादिति चेन्न यः संबंधोऽभावप्रतियोगितावच्छेदकस्तत्र विशेषणोऽन्वयितावच्छेदकसंबंधावच्छिन्नप्र
तियोगिताकविशेष्यनिष्ठाभावप्रतियोगित्वप्रमाविशेष्यत्वाभाववत्त्वस्यैव योग्यतात्वोपगमात् यत्र वृत्त्यनियामक
प्रतियोग्यनुयोगिभावादिः संबंधस्तत्र तादृशसंबंधस्य प्रतियोगितावच्छेदकत्वाभावेन विशेष्यनिष्ठतत्संबंधाव
च्छिन्नाभावाप्रसिद्ध्या योग्यतानुपपत्तिरिति तत्र संबंधनिष्ठप्रमाविरहएव योग्यतात्वोपगमेन सामंजस्यात् य
द्यपि प्रतियोगित्वाभावविशेषेऽन्वयोपपत्तिः नचतथाप्यप्रामाण्यज्ञानानास्कंदितबाधज्ञानस्य विशिष्टबुद्धिविरोधित
या विशेष्ये विशेषणाभावप्रमाविषयत्वज्ञानवद्बुद्धिदोषणत्संसर्गादौ विशेष्यनिष्ठाभावप्रतियोगित्वप्रमाविषयत्व
ज्ञानस्यैव विशिष्टज्ञानविरोधितामतिप्रसक्तायस्यचज्ञानं बाधनिश्चयविशिष्टज्ञानविरोधितदभावएवा
धितत्वरूपायोग्यताऽऽत्साशयेन प्रतियोगित्वप्रमाविषयकत्वाभावानुधावनं अत्र च प्रतियोगित्वस्य विषयपर्यं णाम
तज्ञानस्य विशिष्टबुद्धिविरोधित्वेपि प्रतियोगित्वाभावस्य तदभावाघभावात्मकत्वेपि च प्रतियोगित्वाभावज्ञा

नापिप्रतियोगित्वप्रमाविषयत्वज्ञानस्यप्रतिबंधकत्वमप्रतियोगित्वाभावज्ञानस्यशाब्दबोधहेतुतामुपगम्या
पिवाधग्रहकालेशाब्दबोधापत्तिवारणसंभवेनप्रतियोगित्वाभावस्योपयुक्तत्वसंभवात्तस्याशयेननिष्कलः
लक्षणेप्रमाविषयत्वांशःपरित्यज्यतेप्रमेयंवाच्यमितिविशेषणसंसर्गाभावप्रमारूपवाधकप्रमाणस्यात्रापि
स्थावपीतिशेषःप्रमेयमस्तितिप्रमेयरूपविशेष्यपदार्थेनिष्ठस्यार्थःवाच्यत्वस्यसंसर्गेणवाच्यत्वरूपविशेषणतावल
वाच्यत्वमस्तुविशेषणसंबंधइत्यभिमानेनेदमपिचवाच्यत्वेनभासमानानामपितत्तद्व्यक्तीनांविभिन्नत्वात्तानितत्तद्व्य
क्तिसंबंधत्वाभासंतानेनदत्तविशेषणसंसर्गाभावस्याप्रसिद्धत्वनक्काशःपरंतुविशेषणतानाविशेषेणाक्तामायभावस्यघटप
टोभयत्वाद्यवच्छिन्नाभावविशेषणत्वेनतत्रविशेषणसंसर्गाभावप्रसिद्धिर्द्रष्टव्याननुतत्तद्व्यक्तित्वेनविशेषणविशेष्ययोर्ग्य
त्ताशरीरनिवेशेसामान्यरूपेणविशेषणविशेष्यभावेदर्शयितितत्तद्व्यक्तित्वेनतदुपस्थितेरसत्वेपेलातसर्वत्रयोग्यताज्ञाननिर्वाहः
समानप्रकारकवाधज्ञानस्यैवविरोधितयासामान्यरूपेणविशेष्यादिविषयकवाधग्रहदशायांतत्तद्व्यक्तित्वेनतद्विषयताकत्वे

नसंभवात्सामान्यतः तद्विषयकशाब्दबोधापत्तिश्चेत्सत्तः सामान्यतः पदार्थद्वयघटितप्रतियोगितावच्छेदकत्वाभावगर्भी
योग्यतास्त्रावश्यकत्वात् तस्मिंश्च निरुक्तपदार्थसंसर्गेण तद्विशेषणतावच्छेदकावच्छिन्नप्रतियोगिकत्वविशिष्टत्वात् तत्संसर्गतावच्छे
दके अपरपदार्थनिष्ठेति तत्तद्विशेषणतावच्छेदकावच्छिन्नवृत्तित्वेत्यर्थः प्रतियोगितावच्छेदकधर्मप्रतियोगितावच्छेदक
त्वं तथा च तद्रूपाश्रयप्रतियोगिकत्वविशिष्टया दृशसंसर्गतावच्छेदकेयद्रूपावच्छिन्नबाधकाभावप्रतियोगितावच्छेदकत्वा
भावः सत्तद्रूपावच्छिन्नसंबंधेन तद्रूपावच्छिन्नेधर्मिण्यन्वययोग्यतेत्यर्थः हेत्वनुगतरूपावच्छिन्ननानाव्यक्तिविशेषणकस्थ
ले चालनीन्यायेन सर्वासामेव विशेषणव्यक्तीनामनेकवृत्तिविशेष्यतावच्छेदकसामानाधिकरण्येन संसर्गाभावसत्वे
पि विशेष्यतावच्छेदकावच्छिन्नवृत्तिकाभावाप्रतियोगित्वं सुलभमिति प्रथमावच्छेदकगर्भं ते जीनशेषं तद्वृत्तेरपितत्तद्वि
त्वादिनाभावसत्वेन विशेष्यतावच्छेदकावच्छिन्नवृत्तिकाभावाप्रतियोगित्वस्य विशेषणासंसर्गे दुर्घटत्वात् अत्र घटद्वयादौ
घटाद्यभावएतद्वृत्तिस्वरूपविशेषणासंसर्गसत्वान्योग्यत्वानिर्वाहः स्यादिति विशेष्यतावच्छेदकाश्रयवृत्तित्वमुपेक्ष्य वि

गम·

शेष्यतावच्छेदकावच्छेदकनवतमानित्वस्याभावनिवेशः नचैवं घटत्वाद्यवच्छेदेन एतद्देशवृत्तित्वाद्यत्वयेपि तत्र योग्य
ताप्रसंग इति वाच्यं यत्र तत्र घटादिरूपविशेष्यविशेषणान्वयेन योग्यतापरं त्ववच्छेदकावच्छेदेन बोधविशेषणावि
शेष्यतावच्छेदकयोरवच्छेद्यावच्छेदकभावसंबंधेन विशेषणाविशेष्यभावोपगमादुक्तस्थले तयोः तादृशसंबंधेनान्व
यबोध एव योग्यतासाचउपपद्यत एवेति यदि च अवच्छेदकावच्छेदेन बोधे धर्मितावच्छेदकावच्छिन्नत्वं तु विशिष्टतत्सं
बंधेन धर्मिणि विशेषणस्य संसर्ग इत्युच्यते तथापि दर्शितस्थले विशेषणप्रतियोगितादृशसंबंधाप्रसिद्ध्या न योग्यताल
क्षणातिव्याप्तिः एवं यत्र विशेषणानां नतेपलक्षितविशेषणवत्त्वविशेष्येऽबोधितं विशिष्टविशेषणवत्त्वं तु बोधितं
तत्र विशिष्टप्रतियोगिकविलक्षणवैशिष्ट्यस्य विशेषणस्य च धातामृतेपि तादृशसंबंधस्य विशेष्ये अभावसत्त्वान्नवि
शिष्टवैशिष्ट्यपर्यवाके योग्यतातिप्रसंगः यदि च तादृशबोधप्रतियोगिकत्वाविशेषितैव तत्तत्संबंधो विशेष्ये विशेषणा
संबंधः परे तु विशेषणपर्यन्तेन विशेषणतावच्छेदकस्यैव विशिष्टस्य विशिष्टप्रतियोगिकतत्तत्संबंधपरंपरासंबंधे

नप्रकारतानतदानत्वविशेष्येविशेषणान्वयियोग्यतैवयोग्यतानुमाहृशपदंपदासंबंधेनविशेषणतावच्छेदकान्वयप्र
वेतिवोध्यंनचविशेष्यतावच्छेदकावच्छेदेनवर्तमानाभावविवेशेएतद्दोषाद्वृत्तिघटतात्पर्यकेऽत्रघटइतिवाक्येपियोग्य
तापत्तेः एवमपिजलकरणकत्वसंसर्गस्यसेकाभावसत्वेपिजलकरणकत्वरूपसामान्यधर्मस्यसेकनिष्ठाभाववप्रति
योगितावच्छेदकाभावसत्वेनपयसासिंचतीत्यादिवाक्येऽपिप्रसंगइतिवाच्यंतादृशवाक्येविशाद्
सामान्येज्ञानोपयोगिनायोग्यतायाः स्वीकारेऽपिविरहात्तत्तद्विशेष्यद्विशेषणव्यक्तिघटितायायोग्यतायाअ
पिस्वरूपसत्याः शाब्दवोधोपयोगितास्वीकारेणोक्तवाक्यानांप्रामाण्यापत्तेरनवकाशात्अव्याप्यवृत्तिसंसर्गकस्य
लेसाधारण्यापत्तावपिस्वप्रतियोगितवैयधिकरण्यअभावविशेषणमुपादेयंन प्रतियोगितावच्छेदकविशिष्टकत्व
गर्भेवाच्यंअतः समवायेनघटेतेनाधारादौरूपादिप्रतियोगिताकत्वविशिष्टसमवायाभावस्यप्रतियोगिसमानाधिक णम
रणत्वेपिविशिष्टप्रतियोगिन्याधिकरणत्वेनातिप्रसंगानवकाशः प्रतियोगितित्वस्यविशिष्टसंयोगस्यानुयोगिनिवि

शिष्टप्रतियोगिव्यधिकरणत्वस्य जन्नद्विशेषणप्रतियोगिकत्वविशिष्टसंयोगत्वस्य तादृशाभावप्रतियोगितानवच्छेद
कत्वात् अथ प्रतियोगित्वविशिष्टसंबंधविशेषत्वे विशेष्यवृत्त्यभावप्रतियोगितानवच्छेदकत्वग्रह विशेष्यविशेषणा
संसर्गाभावग्रहस्याभावेन तादृशसंसर्गत्वावच्छिन्नप्रतियोगिताकत्वावगाहिनस्तत्स्य विनिवेशनया तादृशासत्त्वभ्रमाभाव
प्रतियोगितावच्छेदकत्वावगाहित्वं उपगम्य कथंचिद्विरोधितोपपादनेपि सेकोनवह्निकारणकहस्तादे विशेष्यविशे
षणबोधग्रहस्य वह्निकरणकत्वादिस्वप्रतियोगिकसंसर्गकत्वे सेकादिनिष्ठाभावप्रतियोगितावच्छेदकत्वावगाहि
ताया असंभवेन तादृशधर्मे प्रतियोगितानवच्छेदकत्वविरोधितया तादृशबाधग्रहदशायां वह्निनासिंचतीत्यादिवा
क्याद्बोधापत्तिः यत्र विशेषणसंबंधो वृत्तिनियामकः तत्र विशेषणतावच्छेदकधर्मे विशेष्यवृत्त्यभावप्रतियोगिता
वच्छेदकत्वाभाववत्त्वयोग्यताविशेष्यविशेषणतावच्छेदकाभाववद्धित्वाभावस्य दर्शितयुक्त्या तादृशयोग्यताज्ञानवि
रोधितया तादृशबाधग्रहस्य शाब्दबोधाविरोधित्वान्निर्वाहः विशेष्ये विशेषणसंसर्गस्याभावग्रहविरोधित्वस्योक्तौ

९३

योग्यताज्ञानविरोधिनः शाब्दबोधविरोधित्वमिष्टमेव शाब्दबोधे संसर्गस्याप्रकारत्वात् यत्र च विशेषणस्य संबंधो वृत्य-
नियामकः तत्र तत्संबंधावच्छिन्नाभावाप्रसिद्ध्या तत्संबंधेन विशेषणवदन्योन्याभाव एव शाब्दबोधविरोधी इति तत्र वि-
शेष्यतावच्छेदकावच्छिन्नविशेष्यवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकत्वाभावरूपयोग्यताज्ञानस्यैव हेतुतोपगमेऽन्योन्याभा-
वविषयकबाधग्रहतद्विरोधितया शाब्दबोधविरोधितापत्तिरिति चेन्न एवमपि यत्र पदार्थयोः संबंधो वृत्यनियामकः तत्रान्यो-
न्याभावविषयकबाधग्रहदशायामप्रसक्तताभावगर्भयोग्यतातत्संबंधे न शाब्दबोधापत्तिश्च द्विविधमपि योग्यताज्ञानस्य परस्प-
रसहकारेणैकविधशाब्दबोधहेतुतायामनुभयविरोधः अप्रसक्तताभावेऽन्योन्याभावे वा विशेष्यवृत्तित्वभ्रमदशायामप्रसक्तताभा-
वगर्भयोग्यताज्ञानस्यासंभवेन योग्यताद्वयज्ञानेऽपि शाब्दबोधस्यानुभवविकलत्वात् एवं व्याप्याभावज्ञानकालेप्युक्तयोग्यताज्ञा-
नासंभवेन शाब्दबोधापत्तिः नस्य शाब्दबोधे योगस्य साक्षात्प्रतिबंधकत्वायगमकबाधज्ञानस्यापि तथात्वमुपगम्यतां किं योग्य- रा.म.
ताज्ञानहेतुतया न च शाब्दप्रमाभ्रमयोः न च सामग्रीभेदाय योग्यताप्रमाभ्रमयोः तदुभयहेतुत्वमावश्यकमिति वाच्यं विष-

एवाघस्थलेप्युक्तयोग्यतासत्त्वस्योपदर्शितस्योपदर्शितत्वात्तत्प्रमाभ्रमत्वयोश्च शाब्दप्रमाभ्रमनियामकत्वात्संभवा
न्ननियामकत्वान्तरस्यानुसरणीयत्वन्नयानस्मादृशेष्यतावच्छेदकविशिष्टेन हस्तसंसर्गेण विशेष्यतावच्छेदकावच्छिन्नत्व
त्वं योग्यतासंशयसाधारणं उक्तज्ञानमेव शाब्दधीहेतुरतो वा कार्थरूपायास्तस्याः सर्वत्राभिरच्छेतुमशक्यत्वेपि न क्षतिः न
ज्ञानस्य विशिष्टबुद्धिविरोधितायास्त्याभावयाप्यावेद्धदत्तध्याप्यतावच्छेदकधर्मादीनानां सर्वेषां प्रतिबंध्यतया तेषां शा
ब्दधीविरोधितानिर्वाहः उक्तनानाविधप्रतिबंधकानामभावकूटस्य शाब्दधीहेतुत्वापेक्षया प्रत्यक्षप्रतिवधकशाब्दसा
मग्रीशरीरप्रविष्टेशापेक्षया तावत्प्रतिबंधदर्शितेक योग्यताविषयकत्वहेतुत्वेन सामग्रीघटकत्वे च लाघवेन तद्धेतुतासि
द्धिः बाधादिनिश्चयप्रतिबंधकतायां भ्रमत्वज्ञानाभावोऽवच्छेदकः योग्यताज्ञानहेतुत्वे च भ्रमत्वनिश्चयाभावरूपतिगौ
रवस्य तत्त्वमित्यकिंचित्करं प्रतिबंधमालोकादिप्रयाममनुसंधेयलाघवादित्यथमोपदर्शितयोग्यतायाः प्रमागर्भत्वेन
गौरवादिति भावः वाक्यज्ञानत्वादिति प्रथमयोग्यतायां पदार्थानां तत्तद्व्यक्तित्वेनानिवेनीयतया दुर्ज्ञेयत्वादिति भावः

24

पक्षत्वकीयबाधकप्रमाविरहस्यातिप्रसक्ततया पूर्वलक्षणत्वपरिशोधाद् इतरबाधकप्रमासामान्यविरहस्यविव
क्षणीयतया परकीयबाधप्रमायाः सत्वेप्यग्रहेणा [redacted]
प्रथमयोग्यतायाश्च शक्यतानताचरमायाः प्रमयाघटितत्वेन शक्यज्ञानेनेति पूर्वपक्षे बाधकप्रमाविरहस्यज्ञा
नुमशक्यत्वादित्यस्यदर्शनेनाशयव्याख्यानं तत्र शोभनं वा कार्यनिश्चयं विना प्रमयाघटितायाश्च बाधितत्वा
दिरूपयोग्यतायादुर्निश्चयतया संशयसाधारणधियोहेतुत्वात् बाधकप्रमाणाभावस्य दुर्निश्चयत्वेपि च संशयसंभ
वात् ननु नराशिरोस्थिशुचिः प्राण्यंगत्वाच्छंखवदित्यनुमानेन नरास्थिशौचानमशौचाभावरूपशौचनिश्चयसं
भवेन मलमूत्रपुरीषास्थिनिर्गतंत्यग्रहचित्स्याजमित्यादिवाक्यात्प्रबोधानुपपत्तिरिति चेन्न शौचे बाधितत्वग्रहेणा
बाधितत्वरूपयोग्यताज्ञानासंभवादित्याशंकानिरस्यतीति न चेति बाधितात्वाधकग्रहेणासंभवाद्वाधितत्वरूपयो णम·
ग्यताज्ञानेरूपसहकारिसमवधानकानन्यथाबोधः अन्वयबोधासंभवात् उपजीव्यत्वेनेति दृष्टांतरूपदर्शनेनसा

ध्यनिश्चयसंपादकतयोन्नानुमानोपजीव्यमूलस्य वेदस्य मानत्वावच्छेदकरूपेणासञ्जातीयतयाशौचबोधकत्वादृत्त्वे
नेत्यर्थः बलवत्वान्निश्चितप्रामाण्यकत्वात् अशौचबोधकवेदस्य निर्दोषपुरुषादिप्रणीतत्वेन तादृशस्मृतिवाक्ये च
वेदमूलतया प्रामाण्यनिश्चयः संभवतीति बोध्यं तेन तादृशशाब्दबोधार्थविधिविषयकत्वेन तदनुमानबाधादिति अ
शौचानुमितिजनकपरामर्शः प्रामाण्यग्राहकपितत्वानुमितिविघटकतयाऽकार्यं चिकुत्तत्वानामनुमितावप्रामाण्यज्ञापनाद्येत्य
र्थः तथा च तयोग्यताज्ञानविघटनास्तिभावः न तु बाधाप्रमात्वस्य नष्टत्वकारणतायेन तदभावहेतुत्वकल्पनयायोग्यता
ज्ञानहेतुत्वमते गौरवं किंत्वनुमित्यादिसाधारणलौकिकसंनिकर्षाजन्यविशिष्टबुद्धित्वावच्छिन्नं प्रति -- बाधाप्रमाव
हेतुत्वादेव योग्यतानिश्चयदशायां शाब्दबोधहेतुतानिर्वाह इति किं योग्यताज्ञानस्य हेतुत्वे प्रमाणं चिन्त्यम् आकाङ्क्षासत्तिज्ञा
नरूपं सहकारिमात्रसमवहितत्वेन प्रमाणतां शाब्दबोधोपधायकतायोग्यतापियोग्यताभ्रमविरहितोऽपि नीशाब्दबोधोपधा
नप्रयोजकसामग्रीप्रविष्टो न्यते बाधाभावस्य बोधनिश्चयाभाववत्सत्वमात्राहेतुत्वाल्लौकिकसन्निकर्षाजन्यविशिष्ट

बुद्धिसामान्यप्रतिक्षेपसहेतुतयाऽनतिप्रसंगात्ः बाधे शाब्दधीविरोधिनिर्बाधनिश्चयो हि यतः प्रमाणदोषः शाब्दधीजन-
कयत्किंचिज्ज्ञानविरोधित्वस्यावश्यवक्तव्यत्वमिति तथा च योग्यताज्ञानस्यानरहेतुत्वे बाधे शाब्दधीजनकयत्किंचिज्ज्ञान-
विरोधित्वनिर्वाहात्तस्यानुद्भूतत्वमानस्यकमिति भावः विषयबाधस्येव प्रमाणदोषतासंभवेन यथाश्रुतासंगतिर्वी-
ध्या प्रमाणविषये शाब्दज्ञानजनकसकलज्ञानानां बाधस्थले सत्त्वेन बाधासंभवात् बाधबुद्धेः शाब्दबुद्धिविरोधित्वासं-
भवात् ज्ञानकज्ञानं विघटयत एव ज्ञानस्य जन्यज्ञानविरोधित्वमिति नियमादिति भावः अनुमितिप्रतिरोधिनो बाधस्य हे-
स्यात्ज्ञानकज्ञानाविघटकत्वेनतद्व्यभिचाराद्धेतुकनियमसंभव इति अनुमितिस्थलमेव दृष्टान्तयति पर्वत इति बाधाद्धे-
सिद्धिघातः बाधज्ञानेन व्याप्तिज्ञानाविघटनेन तस्य साक्षात्साध्यानुमितिज्ञानविघटकत्वासंभवादत आह उपाधिकल्पनद्वारा सं-
पादित्व ज्ञानसंपादनेन उपाधिज्ञानस्याविव्यभिचारज्ञानद्वारत्वात् बोध्याबाधस्योपाधिकल्पकत्वं बीजभूतं दर्श- ग्रम
यति निरूपाधाविति पक्षधर्महेतोरिति शेषः बाधानवकाशात् पक्षस्याबाधितसाध्यकत्वात् स्वपक्षधर्मव्याप्यहेतुकेदुदो

वाह्निमाम्भूमादित्यादेरुपाधिकत्वस्य कात्स्न्यासंभवे विपक्षधर्मज्ञानविघटकत्वं बाधज्ञानस्येति नियमनिर्वाहो दृष्ट
व्यः पक्षधर्मताज्ञानविघटकत्वे च स्वव्याप्यवत्त्वेन गृहीतसाध्यस्याभाववद्धे पक्षे हेतोरभाववद्धेत्वस्यासंभवाद्बो
धं च बाधितत्वादिज्ञानस्यानुमितिहेतुतामते बाधस्यान्तद्विघटकतयैवानियमोपपत्तिर्दृष्टव्या प्रयोजिके तिशाब्द
सामान्यं प्रतीत्यादिः शाब्दाभासः शाब्दभ्रमः उच्छेदप्रसंगादिति भ्रमस्य ले विषयबाधस्यावश्यकतया स्वरूपसत्सा
मर्थ्यद्भावरूपायायोग्यतायाश्च संभवादिति भावः उपायाभावादित्यत्र बाधरूपयोग्यताग्रहे बाधरूपकोटिमाननिवृत्ति
प्रयोजकाभावादित्यर्थः विपर्ययो भ्रमः प्रमाश्चबाधितानन्तकोटिनिश्चयः तत्साधारण्यस्यानन्तसाधारण्यायोग्यताज्ञान
त्वावच्छिन्नस्यानुसंशयसाधारण्ययोग्यताज्ञानस्य हेतुत्वेप्ययोग्यतानिश्चयदशायां न शाब्दधीप्रसंगः अयोग्यतानिश्चयानंतर
क्षणे न तत्संशयासंभवेनीयसंशयाजनकक्षणे अयोग्यतानिश्चयसंभवेन सामग्र्यां सत्यादिसत्त्व आहायोग्येतिज्ञानस्येति विशिष्टबु
द्धिप्रतिबंधकस्य विशिष्टबुद्धिसामान्यविरोधिनः सर्वत्र शाब्दादिबुद्धिसामान्ये भावात् कारणीभूतापक्षणात् ननु शाब्दधीप्र

स्वर्यनिश्चयासंभवेन तत्साधारणहेतुत्वाभिधानविरोध इत्यत आह क्वचिदिति योग्यानुपलब्धेति यत्राभावस्य तथात्वेना
तदभिप्रायेणेदं योग्यानुपलब्ध्या ग्राह्यघटाद्यभावस्य प्रत्यक्षतो निश्चये विशिष्य तदभावस्य घटादेः संशयासंभवेन तत्र
विशेष्यावृत्तित्वनिश्चयाद्विशेष्यावृत्तित्वाभावरूपविशेषदर्शने न घटाद्यभावविशेष्यवृत्त्यभावाप्रतियोगित्वस्य तत्त्व
माविषयत्वस्य च तन्निश्चयत्वं बोध्यम् ॥ एककार्यानुकूलत्वं संगतत्वं योग्यतां निरूप्यासत्तिं निरूपयितुमाह आस
त्तिश्चेति अव्यवधानेनेति विशेषणे न तु नीयात्तथा चाव्यवहितत्वसोपस्थितौ वैशिष्ट्यलाभात् पदयोः पदार्थयोः परस्प
रान्वयबोधः तदेकभावोपस्थितावव्यवहितपरोपस्थितिः तदन्वयबोधोपयिका सतिरित्यर्थः नीलो घटो द्रव्यं पट इत्यादौ
क्रमोच्चरितनीलादिपदेभ्यः क्रमेणानीलाद्यर्थोपस्थितेः नीलाद्युपस्थित्यव्यवहिततया न नीलपदाद्यन्वये नीलपदादि
पदानामासत्तिः इयं चासत्तिर्जनकत्वसंबंधेन पदनिष्ठत्वमुपपादयति अव्यवधानं च तत्ध्वंसाधिकरणसमयध्वंसान रामः
धिकरणत्वे सति स्वप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वं स्वसमयः ज्ञानवृत्ति त्वं पूर्वोत्तरसाधारणबोध्यं एकार्थे

पस्थितेस्तु तथा च पररूपदोपस्थिति सा अपरपदार्थोपस्थितेर्व्यवधानेपि निरूढक्रम व्यवहितत्वं नीलो घट इत्यादौ च नाशङ्का
नां नीलघटादिपदानामक्षतमेव नीलाद्युपस्थितितृतीयघटाद्युपस्थितिक्षणोऽनधिकरणत्वं तद्व्यसत्तान्त्वयुतः प्रकृ
तान्वयबोधानुकूलोपस्थितेस्तदर्थं नन्तरितत्वमेवाव्यवधानं अर्थोपस्थापकपदोपस्थितिरर्थोपस्थितिद्वारा प्रकृतान्वय
बोधानुकूलेवेति तथार्थोपस्थितेर्नोपनीतिप्रसंगः अतो नीलाद्युपस्थितेरनन्तरं घटादिपदाद्घटरूपकार्यकारणघटैकवर्णग्रहे
णेऽमेव घटादिरूपार्थोपस्थिति तदुपस्थितिक्षणस्य नीलाद्युपस्थितिनाशाधिकरणसमयेव्वसाधिकरणतया अनधिकर
णत्वांत विशेषणाक्रांतत्वेपि न दोषः प्रकारादिसकलवर्णोपस्थितीनामेव घटाद्युपस्थितिद्वारा घटादिघटितवाक्यार्थबोधा
नुकूलतया नीलाद्युपस्थितेस्तु तत्त्वघटितनद्व्यवधानस्य घटाद्युपस्थितावक्षततया नानेन नीलः सुंदरो घट इत्यादौ नीला
द्युपस्थितेरेव विशेषणांतरसुंदरोपस्थित्यादिनाव्यवधाने न नीलघटाद्योपस्थिति प्रसक्तिरिति दोषस्यानवकाशः अत्र प्रकृ
तेतादृशनानाविशेषणाविशेषितघटादिरूपवाक्यार्थबोधस्कंदरादिरूपविशेषणानुपस्थापकपदोपस्थितीनामनुकूलता

न्ग्रामं भुंजानश्चैत्रो ओदनं गच्छतीत्यादौ भाजनगतौदनभोजनाद्यन्वयबोधप्रयोजिकाऽसत्तिप्रसंगः अवधायकतन्त्रस्यदा
र्थोपस्थितीनां मदनुकूलत्वस्य दार्थोपस्थितीनां च तावत्पदार्थघटितमहावाक्यार्थबोधानुकूलत्वादिति वाच्यं यतो यादृश
विशेषणविशेष्यभावापन्नस्वप्रकारतया प्रकृतवाक्यार्थबोधमाने तदनुकूलविशेषणतानुपस्थापकशब्दोपस्थितस्यान्वय
प्रतियोग्युपस्थापकशब्दोपस्थितीनामेव प्रकृतवाक्यार्थबोधानुकूलत्वेन विवक्षणात् घटः सुंदरो नील इत्यादौ सुंदरादि
पदार्थविशेष्यतापन्नघटादौ नीलादेः प्रकारतया नीलाद्युपस्थितेः सुंदराद्युपस्थित्या सुंदरपदाद्युपस्थितिव्यवहितत्वेपि
चैत्रो ग्रामं गच्छतीत्यादौ ग्रामकर्मकत्वादिविशेषितगत्यादेः चैत्रादौ प्रकारतया गत्याद्युपस्थितेर्गत्याद्युपस्थित्या चैत्राद्युप
स्थितिव्यवहितत्वेपि च नीलघटाद्यागति चैत्राद्योरन्वयेनासत्तेरनुपपत्तिः सुंदरादेर्ग्रामकत्वादेश्च निरुक्तविशेषणताद
पन्नत्वात् दर्शितानामसन्नस्थले चातादृशविशेषणोपस्थित्यापि भिन्नभोजनाद्युपस्थितेर्विशेष्यविशेषणोपस्थितित्वमव्य ग्रम॰
वधायकत्वाभावान्नातिप्रसंगः अत्र वदंति क्रमिकाणां पदार्थोपस्थितीनामेकदाऽसत्त्वेन सर्वत्र समूहालंबनात्मिकानावत्प

दार्थोपस्थितिस्त्वस्मंस्वीकारणीया अन्यथा पदजन्यपदार्थोपस्थितिरूपशाब्दबोधहेतोर्विशेषणताज्ञानरूपविशिष्टबु
द्धिहेतोर्विरहेण शाब्दबोधानिर्वाहात् तथा चासन्नस्थलेपि समूहालंबनेनावसपदार्थोपस्थितिस्वीकारस्यसापिस्या
व्यवहितत्वेन तादृशपदार्थोपस्थितेरासत्तिनिर्वाहकत्वमनासन्नतदस्वीकारे उक्तकारणाविरहादेव शाब्दबोधानुत्पादनि
र्वाहे अनन्यव्यवहितोपस्थितिरूपासत्तेः शाब्दबोधोपयोगितया न च भेदगर्भाव्यवधानविवक्षया क्रमिकोपस्थितीना
मेवासत्तितया अनासन्नस्थले च समूहालंबनोपस्थितिस्वीकारेपि क्रमिकविशेषणविशेष्योपस्थित्योरव्यवहितत्वेना
सत्तिताविरहाच्छाब्दबोधानुत्पादासत्त्वेनासन्नपोर्विशेषं क्रमिकविशेषणाद्युपस्थितीनां शाब्दबोधाव्यवहितपूर्वम
सत्त्वेन पश्चादासत्तिज्ञानस्यैव शाब्दबोधहेतुतया नानुपपत्तिः अत एवासत्तिभ्रमादनासन्नस्थले शाब्दधीः क्रमिकोपस्थितीना
मव्यवधानभ्रम इति वाच्यं· शाकघटकपदानां क्रमिकतया तेषां क्रमिकज्ञानस्यावश्यकत्वेपि अवांतरानारुपदेर्यत्र
पदार्थानोपस्थापिता अपितु समूहालंबनस्मृतिमाहात्म्यस्मरमप्यसमूहालंबनोपस्थितिर्जनिता न त्वासत्त्युपपत्तेः· यत्त्वन्य

२८

यत्प्रतियोगितत्वउपस्थितिर्यत्रेति बहुव्रीहिर्यत्रान्वयः प्रतियोगित्वोपस्थितिपदं स्वचयोपस्थापकपदोपस्थितिपरं तादृशा
पदपरं तात्तथा च पदोपस्थितेः पदस्यानास्यव्यवधानमासत्तिरिति । एतदपि न तथा च सति सा च स्मृतिर्नानुभवोऽतो नान्वो
न्वाश्रयइत्युक्तं ग्रंथात्संगतेः अर्थोपस्थितेरनासत्तित्वात्पदार्थोपस्थितेः पदस्य वा पदघटितापिकायाः नस्माशाब्दानुभवेऽन
पेक्षितत्वात्तस्यास्याप्यनुभवेऽनपेक्षितत्वात्तस्यानुभवत्वेपन्मोख्या प्रयाग्रसत्केः पदोपस्थितेः पदस्य च यथा शा
नुभवहेतुतायाः शंकानाऽऽरोहात् । मिश्रास्तु एकपदप्रतीतिसमनुव्यवधानेनान्यपदप्रतीतिजिज्ञासर्थमेव पदयोरासत्तिरत ए
व मोनि श्लोकस्य ले मोनिनाप्रतिसंधितानां विभिन्नकालो — रितपदानां व्यवहितत्वेपि व्यक्तास्य विषयपदानां चान्व
याबोधकत्वात् श्लोकादिस्थपदानां च व्यवहितानामपि व्यवधानभ्रमो योजनया क्रियते इत्यपि न तेषां व्यवधाननिश्च
येनाव्यवधानभ्रमासंभवात् अव्यवधानेन तत्तत्सदप्रतीतिरभिमता यथा कथंचिदव्यवधानेनान्वयप्रतियोगिनामुप राम·
स्थितिउपयोगितया मूलस्यापि तादृशाभिप्रायस्यासत्तित्वेनास्वर्यत्वाच्चेत्यनभिधानं च यथा श्रुताभिप्राये तो स्वाद्वः वस्तु

तो हस्तस्य पदजन्यपदार्थोपस्थितिविरहेणासत्तेः अव्यवधानेनेत्यादिमूलस्यापि स एवार्थः अव्यवधानपदस्याव्यवधानघटि
तपदजन्यत्वार्थकत्वात् तस्य च स्मृतिविरहसादाद्यन्योन्याश्रयपदमात्मात्र्ययपरं उक्तासत्तेः स्वरूपसत्या एव तस्या हेतुत्वा
त् साक्षादेव तदभावे तदपेक्षयान्योन्याश्रयाप्रसक्तेः उपस्थितेरनुभवरूपत्वेऽनुभवात्मकासत्तिनिर्वाह्यशाब्दसामग्र्याः
शाब्दानुभवनिर्वाहकत्वमित्यन्योन्याश्रयस्यैव प्रसक्तस्तात्पर्यं यथाश्रुतार्थमेव नीलो घटादृश्यं पदद्वयसादौ तिरिर्भुक्तम
ग्रिमानेव दक्षइत्यादौ नीलपदजनितोपस्थितिमहादिपदाभावानाम्यवोधः तत्तत्पदार्थान्वयतात्पर्यएकवाक्यताभिप्रायमेव वा
अभावात् यत्र तादृशं तात्पर्यं तत्रैव न दृष्टविलक्षणाः कथंचित्तात्पर्यग्रहे च भवत्येव शाब्दबोधः तद्ग्राहकतयैव च श्लो
कादेर्योजनोपयोगः क्रमेण स्वकार्यदेयतापिशाब्दधी विलंबे न रसस्य विलंबादेव साक्षेति अव्यहितपदार्थोपस्थिति
रूपासत्ति श्चात्पर्यः सानुभव इति यथविभेदगर्भाव्यवधाननिवेशो नानुभवरूपताप्रसक्तिः अनुभवार्थकपदार्थद्व
योपस्थितेः ऐक्यात् तथापि दर्शितायाः अस्पष्टतया अभेदेऽव्यवधानशंकया अनुभवरूपताप्रसक्तेः नासंगतिः

२१

नान्योन्याश्रयइतिनवाच्यंबहिरंगविशेषणानामनुपपत्तिरितिशेषः नानाविशेषणेतिककारशून्यःपाठःसाधुः
विशेषणकेतिपाठेविशेषणपदादेवस्वार्थिकःनतुबहुव्रीहिसमासाजः कर्मकर्त्रादीनांचविशेषणत्वेनविव
क्षितत्वतयाबहुव्रीह्यसंगतेः तथाचकर्मकर्तृकरणाधिकरणक्रियादिरूपाणियानिविशेषणानितथानिरू
पिकाणिपदानिवाचकशब्दात्तज्ज्ञानानांक्रमिकाणांपदार्थोपस्थितीनांयौगपद्यंयद्येकस्यानंसंभवतीत्य
र्थः उपस्थापकपदानामुपस्थितिक्रमप्रयोजकत्वेनाभिहितंकर्मकर्त्रादीनांचैकत्रबोधविशेषणत्वमपे
क्षितंकर्तृत्वस्यपरस्थलेएवकर्मणोविशेषणतयातत्रकर्तुरविशेषणत्वात् संभवात्तुवागौर्दुह्यतेक्षीरंचैत्रेणे
त्यादौएकस्मिन्बोधेक्षीरादिरूपेफलकर्मस्थविशेषणत्वंतथापिसर्वेषामेकबोधविशेषणत्वस्यविवक्षितत्वेन
दाक्षेपसमाधानायसमूहालंबनस्मृतेःशाब्दबोधस्यस्वीकरणीयतयातदुपर्युक्तद्वयमाकांक्षितमित्याहइना
न्त्रवान्तरवाक्यार्थबोधात्स्वमहावाक्यार्थबोधनिर्वाहकंसमूहालंबनस्मृतिकल्पनयेसाक्षेपासंगतिः कर्मक रामः

आदीनां विशेषणानां परस्पराकांक्षाविरहेण विशेषणद्वयादिविषयकानांतरवाक्यार्थबोधासंभवेन समू
हालंबनस्मृतेरावश्यकत्वात् । धर्मत्वमाश्रित्येत्युक्तिः योग्यस्वार्थसंसर्गबाधकप्रमारहितं सन्निधानं प्रपद्य
ते पदापदात्वार्थोपस्थित्यव्यवधानेनोपस्थितिविषयो भवति तेन वक्तृना अन्वितः स्वार्थः स्वस्वोपस्थापितोऽर्थः प
दैरेवावगम्यते तदनंतरमेव तैस्तैः पदैर्बोध्यते तथा च घटमानयेत्यादौ घटकर्मकानयनबोधात्पूर्वं घटकर्मकाघ
न्वि स्वकर्मत्वादिबोधोत्पत्त्यसात्तादृशबोधस्यैव पदजन्यघटाद्युपस्थितिरूपस्य महावाक्यबोधे घटादिमात्रकत्वसंभवेन
घटादिविषयकसमूहालंबनस्मृतिः कल्प्यते अपि तु चरमपदार्थस्मृतिमात्रमिति भावः एवमिति महावाक्यार्थ
बोधात्पूर्वं अवांतरवाक्यार्थबोधजननेऽसमर्थः अन्वयांतराभिधानं अवांतरवाक्यार्थस्य पदांतरसहकारेणावांतर
वाक्यार्थेन सह पदार्थांतरविषयकत्वान्जननं विलक्षणव्यापाराभावात् जनितान्वयबोधत्वेन निराकांक्षतया शब्द
स्यैकबोधं जनयित्वा बोधांतरजननासंभवात् एवमपीति प्रथममवांतरबोधजनने महावाक्यार्थबोधाजननात्तु

पयतावपीत्यर्थः प्रथममन्वये पूर्वमवांतरबोधानुत्पादहेतुत्वनुपपत्त्यात प्रयोजकत्वस्य दुर्वारत्वात् सामग्रीवि
रह एव वाक्यार्थतत्प्रयोजकत्वस्याशंकां निराकुरुते उत्तरस्योन्हीति· उत्तरस्य महावाक्यार्थबोधस्यैवमवांतरवा
क्यार्थबोधे जाते निराकांक्षत्वं· सामग्रीवैकल्यं सामग्रीविरहप्रयोजकत्वं न तु पूर्वस्य अवांतरवाक्यार्थबोधस्य न सा
मग्रीविरहप्रयोजकत्वं न तु पूर्वमन्वयबोधानुपधानसत्वेन निराकांक्षत्वासत्वादिति भावः· तथा च सामग्रीबलाद
वांतरबोधस्य महावाक्यार्थबोधात्पूर्वमावश्यकत्वे महावाक्यार्थबोधनिर्वाहाय फलीभूतबोधानमूलविषयक
बोधानुपधानस्यैवाकांक्षात्वमभ्युपगतं· न च पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ तात्पर्याभावादेव राजपुरुषाद्यन्व
यबोध इति भावः· यद्यपि घटमानयतीत्यादौ घटकर्मकानयनादितात्पर्यके कथं प्रथमं तो घटकर्मकादिमात्रा
न्वयबोधः तस्य तात्पर्याविषयत्वाभावात्· न च महावाक्यार्थबोधात्मकतात्पर्यस्यैवावांतरबोधोत्तरकालतयाव एम·
स्यदार्थेति अवांतरवाक्यार्थघटकपदार्थसमुदाये इत्यर्थः उक्तैव समूहालंबनस्मृतिरेव सा या वांतरवाक्यार्थघटका

र्थान्वयस्यानुपपत्तेरेवमप्युपपत्तेरेतनाश्ववगाहमानगतिरिति च यत्पदार्थोपस्थापकचरमस्यैतंत्रतास्वी
करणीयतया ऽवान्तरवाक्यार्थानुभवविनाशशाब्दबोधक्षणाव्यवहितक्षणपर्यंतं तदवस्थानात्तस्य प्रत्यक्षानुमितिरूपप
दविषयकपदार्थोपस्थितेरपि विशेषणज्ञानविधया + य + किंतु क्वचित्तद्विशेषकर्मादीनां नानापदार्थानां क्वचित्कर्त्रादीनां क्वचि
त्करणादीनां क्वचिदधिकरणादीनां क्वचिच्च क्रियादीनां विशेषणत्वं विवक्षितं क्रियादिपदानन्तरादिपदस्य कर्मादिप
देनाभिसंबंधात्कर्मादीनामित्यादौ कर्मत्वक्रियादीनां विशेषणतानामादिपदेन परिग्रहः तथा चोदनं काष्ठैः पचतीत्या
दौ इव कर्मकरणादौ एकस्य विशेषणतया ओदनं पचति काष्ठेन पचतीत्यादौ ओदनकर्मत्वपाकादिविशेषणोपस्थिती
नां योगपद्यासंभवेन शाब्दबोधानुपपत्तिरिव दर्शनपरोपग्रह इति तत्रापि समूहालंबनतावत्पदार्थस्मृतिकल्पनं समाधान
ग्रंथाभिमतं तत्र चोदनकर्मत्वाद्योः परस्परमन्वयसंभवेनावान्तरवाक्यार्थबोधान्महावाक्यार्थबोधोपपत्तावनपेक्षय
संगतिः मैलकामावादिति मिलनामावनियमादित्यर्थः क्रमिकोपस्थितीनां योगपद्यविरहेण तत्कालं समूहालंबनता

वत्सदार्थगोचरस्मृतेः प्रत्येकस्मृतिजन्यसंस्कारसमुदायादवांतरपदार्थानामस्मरणोऽप्राचीनानुभवजन्यप्रत्येक
संस्कारसमुदायात्संभवेन तत्र एवं शाब्दी रीतिसमाधाने क्रमिकपदज्ञानानां योग्यतासंभवे तेभ्यः समूहालंबन
पदार्थस्मृतेः संभवात् अवांतरसमूहालंबनपदस्मृतेरनंगीकृते श्रोत्रेति क्रमिकवर्णसमुदायात्मकपदस्यैकप
दार्थस्येव क्रमिकज्ञानवद्वर्णानुभवानां योग्यपर्याप्त्यनुपूर्वीविषयकत्वेन तत्तदर्थमात्रज्ञानावच्छेदकावच्छिन्नविषयक
समूहालंबनपदस्मृत्युपपत्तावपि प्रत्येकवर्णानां श्रोत्रलौकिकप्रत्यक्षे पूर्वपूर्ववर्णानुभवोपनीतानां पूर्वपूर्वव
र्णानां ध्वंसवत्त्वरूपोत्तरत्वस्य प्रकारतया तत्तदर्गतयावाभानसंभवेन श्रोत्रप्रत्येकपदानुभवनिर्वाहः तत्तत्तावत्सदर्गो
चरसमूहालंबनस्मृतिः अन्यत्र विषयइति शेषः स्मृतिः संभवति विशेषः संस्कारस्य स्वाविषयकज्ञानाजनकत्वनियमा
दिति भावः न चैवं प्रत्यभिज्ञानुपपत्तिः प्रत्यभिज्ञायां तत्तत्स्मृतेरेव हेतुत्वोपगमात्र तत्तत्संस्कारस्य स्मृतिघटितत्वाद्वा उक्त रामः
नियमस्य तादृशनियमस्य वा प्रामाणिकत्वात् इत्याशयेनाह वाक्यार्थेति अन्यथानुपपत्त्या समूहालंबनस्मृत्यादिकं विनाऽनुप